# Tarkabhāsa and Vādasthāna

OF

# MOKṢĀKARAGUPTA AND JITĀRIPĀDA

EDITED BY

VIDYABHUSANA

H. R. RANGASWAMI IYENGAR, M. A., K. C., T.E., M.T.A. (Italy)

*Superintendent, Oriental Research Institute*

*Mysore.*

with a Foreword by

MAHĀMAHOPĀDHYĀYA

VIDHUŚEKHARA BHATTĀCHARYA

*Asutosh Prof. of Sanskrit, Calcutta University. (Rtd.)*

Printed at

The Hindusthan Press, Mysore.

1952

*All rights reserved*]

[Price Rs. 5

SECOND EDITION

5-0610-B
28/V/45
Institut für Tibetologie und Buddhismuskunde * Universität Wien *
23.4.75

*Copies can be had of :—*

R. Ramanujan, B. Sc.,
2761, V Main Road, Vanivilasa Mohalla P. O.
Mysore, S. India.

# FOREWORD

It is owing to the great Acārya Diṅnāga, who is rightly regarded as the father of the Mediaeval Logic in India, that we have the systematisation of the Buddhist Logic. He is much criticised by the Brahmanic teachers, such as Uddyotakara and Vācaspatimiśra, in their philosophical or logical works. His master-piece on the subject is *Pramāṇa-samuccaya*, the original Sankrit of which is not yet found, perhaps being lost for ever. Only the Tibetan version of it is now available, and we are glad that, as is well-known to scholars, the present editor of the *Tarka-bhāṣa*, Sri H. R. Rangaswamy Iyengar, has already restored the first chapter of that work mainly from its Tibetan version. He has offered us a new edition of the book with the help of the Tibetan version of the *Tarkabhāṣa* of Mokṣākara Gupta though it is already edited for the first time in the Gaekwad's Oriental Series (1942). He is justified in bringing out a new edition. Though the first edition is based on three manuscripts, it is not found to be satisfactory at all. It is full of defects and these could not be removed owing to lack of sufficient materials. The manuscript, on which the new edition is based, is far better than the other three referred to above. Besides, the text represented by it is thoroughly compared with the Tibetan translation. My own experience shows that one can derive great help from a Tibetan version in ascertaining the true readings of a work when it is available. It is further to be noted in this connection that Sri Iyengar, in his edition, has the benefit of comparing the readings also in the Baroda manuscripts as given in the first edition.

It is true that there is room for further improvement in the present edition, which will, let us hope, be done by the editor in the next edition. Yet, it must be admitted that we may rely more upon the present edition than upon the former one.

After Dinnāga, in the line of logicians that followed him, is the most celebrated logician, Ācārya Dharmakīrti. He is an author of many works on logic, some of which are now available in Sanskrit, or in Tibetan, or in both of them. Ācārya Jitāri is also a renowned teacher in the same line. He is the author of several treatises of which *Hetutattopadesa* is restored into Sanskrit from its Tibetan version by one of my pupils, Sri Durgacharan Chaterjee, and published by the University of Calcutta. *Jātivāda* is another short treatise on logic by him. It is published with some lacunae by Prof. G. Tucci in the *Annals of the* BORS Vol. XI, pp. 54. Thanks to Sri Iyengar, we have been able to secure another work of Jitāri, which was hitherto unknown. It is *Anekāntavāda or Digambaramataparikṣa*, which he has published, along with his *Jātivāda*,

As regards the *Tarkabhāṣa* he proposes to add an English translation, and it goes without saying that it will enhance the value of the work.

*Visva-Bharati,*
*Santiniketan,*
*5-12-1943*

VIDHUSEKHAR BHATTACHARYA.

# PREFACE

Years of exploration have brought to light many of the cultural treasures of Ancient India which lay hidden and inaccessible to the world of scholars. But these treasures are so numerous and varied that the efforts of the last fifty years, may be said to have unearthed not even one tenth of them. Books of Ancient Indian Culture have not only remained in India but also have migrated to Central Asia, Tibet and China and some of them have been preserved either in their originals or in translations. The work of exploration cannot, therefore, be confined to India; but should be extended to these countries. In fact several MSS of priceless value have already been discovered in some of these lands by the heroic efforts of scholars like Sir Aurel Stein, Dr. Denison Ross, Prof. Sylvain Levi and Dr. Sarat Chandra Das. The recent expeditions of Rev. Rehula Sankrityāyana to Tibet in search of Mss. have revealed the existence in Buddhist monasteries, of not only Tibetan translations but of Sanskrit originals of many works, which had been considered entirely lost. The attempts made so far in this direction have, however, been inadequate and isolated; and unless systematic and organised exploration is carried out, many of the cultural treasures may irretrievably be lost.

The *Tarkabhāṣa* of Mokṣākara Gupta is one of these works which were considered extant only in Tibetan translations. It is a matter for gratification and pride that the

Oriental Library, Mysore, (now Oriental Research Institute) well-known among the Indologists for its Mss. collections and publications, has been able to discover and acquire a palm-leaf Ms. in Kannada script of the Sanskrit original of this work. The discovery of this Buddhist work should be considered as epoch-making in the history of the institution; for, during the last fifty years of its existence, this institution has not acquired a singal Ms. copy of any work on Buddhist philosophy. Added to it is the strangeness, that the Ms. of this work has been found in the private collections of a Jain Pandit at Holenarasipur, a place about 50 miles distant from Mysore. It was brought over by the Travelling Pandit of the Library as a gift from the owner The publication of this work will surely be of great value to Indologists.

The *Tarkabhāṣa* of Mokṣākaragupta is a short treatise on Buddhist Logic and Epistemology. A reference to it, in the available literature, is found in the *Tarkarahasya Dīpikā* of Guṇaratna, a commentary on the *ṣaddarśana Samuccaya* of Haribhadra Suri. Gunaratna, who lived in the beginning of the 15th Century, in the chapter on Buddhism of his work, regards *Tarkabhāṣa* as one of the ten important works on Buddhist Logic. Another refernce to this work is found in the unpublished Jaina work, the *Nyāyamaṇīdipikā*, a commentary on the *Pramēyaratna mala* of Anantavīrya. The author of this work refers to it as Dharmakirti *Tarkabhāṣa*, perhaps to distinguish it from the Jaina *Tarkabhāṣa* of Yaśovijaya and quotes in the second chapter the following passage which is found in the present work.

"धर्मकीर्तितर्कभाषायां, अनयाऽनुपलब्ध्या अभाव-व्यवहारस्साध्यते नत्वभावः तस्य प्रत्यक्षसिद्धत्वात्"
But this *Tarkabh*āṣā has to be distinguished from two other works of the same name which have been published : (1) the *Tarkabh*āṣā of Keśavamiśra (1275 A. D.) and (2) the *Tarkabh*āṣā of the Jain Logician Yaśovijaya of the 17th Century (1608-1688).

The author of the present work is Pandita Sthavira or Mahāpandita Bhikṣu Mokṣākara Gupta of the Raja Jagaddhala Vihāra (the great monastry of Jagaddhala) near Bogra in Eastern Bengal. He seems to have lived in 1110 A. D. and written this only work of his under the patronage of the Pala kings of Bengal. He was a follower of the Budhist logicist Dharmakirti and has, in fact, written his work, as is clear from the opening verse, to convey to the dullwitted, the great teachings of Dharmakirti. He quotes profusely from the two works of his master—the *Pramāṇa Vārtika* and the *Nyāya Bindu* and in defending the tenets of the Buddhist Logic he criticises Kumārila, Trilocana, Vācaspati and others. Like a true Buddhist Bhikṣu, Mokṣākara Gupta has written his work, not for any gain of his own, but for the good of the world and for the propagation of Buddhist culture ; for, in the verse at the end of the work, he says that, if any merit were to accrue by his writing, let it serve as a means for the liberation of the world from misery and the attainment of Buddahood.

The *Tarkabh*āṣā is a small work, a *Sapta Śatika* in three chapters expounding the theories of Buddhist Logic and Epistemology as explained by Dharmakīrti. The

opening chapter deals with *pratyakṣa* or perception and the other two chapters with Inference or *Anumāna*, the only two pramāṇas accepted by the Buddhists. *Pramṇa*, according to the author, is right knowledge or knowledge which does not contradict experience and leads to purposive action.

On the basis of the definition he rejects the *pramāṇa*, of Upamāna, Sabda, Arthāpatti and Abhāva accepted by some of the other schools of Indian thought and supports the Buddhist view that Pratyakṣa and Anumāna are the only two pramāṇas. This is followed by the statement of the definitions of Pratyakṣa as knowledge free from mental construction and error, the object of Pratyakṣa as the Svalakṣaṇa or the thing-in-itself, and of the division of Pratyakṣa into (1) Sense-knowledge (2) mental sensation (3) self-consciousness or Svasamvedana and (4) mystic intuition of the yogi. The chapter closes with a discussion on the act of cognition and its result.

The second chapter is devoted to the exposition of the theory of Inference for one's self. Inference, according to the Buddhists, is two fold ; Svārtha and Parārtha. The former is an internal process of cognition while the latter is the process of communicating to others by words what has been cognised internally. The reason or hetu, through which we infer, has a threefold aspect and we reason through Svabhāva or Identity; karya or causation, and Anupalabdhi or negation. The varieties of judgements that are possible under the three classes of reason are stated and explained with appropriate examples.

The last chapter of the work is devoted to a detailed exposition of the inference for others or syllogistic reasoning. The three aspects of the logical mark or hetu, viz.,

(1) *Anvaya* or direct concommittance i.e., the major promise expressed positively, (2) *Vyatireka* i.e., its contraposition and (3) *Paksadharmatva* or the presence of the mark or hetu in the subject of Inference and the two methods: the method of agreement and the method of difference are explained in brief. While enumerating and explaining the varities of syllogism under the three classes of reason with examples, Mokṣākara Gupta brings into discussion the Buddhist theory of momentariness, the teleogical argument of the Naiyayikas for the existence of God, the conception of the ultimate nature of Reality according to the four schools of the Buddhists, the Vaibhāṣika, the Sautrāntika, the Yogācāra and the Mādhyamika.

This edition of the text has been prepared on the basis of both the Sanskrit and Tibetan versions that were available. For the Sanskrit version, I have mostly depended upon the Ms. (M) of the Mysore Oriental Library. It is a palm-leaf Ms. written in old Kannada script with marginal notes on some of the difficult words of the text. Unfortunately the edges of some of the leaves are broken and three leaves are missing in the middle. The lacunae in the text have been filled up by the help of the Tibetan version (T.)– and the Sanskrit Version published in the Gaekwad Oriental Series with a Sanskrit commentary by Embar Krishnamacharya (Gos), which I was able to secure through the kind courtsey of Mr. B. Bhattacharya, Director, Oriental Institute, Baroda, just when the first forme of my edition of the text was about to be printed.

The Tibetan translation of the text is found in the Mdo. ze, folio 373-413 of the Bstan-hgyur collections. A transcript of the Tibetan text was obtained from Calcutta through my teacher Mr. V. Bhattacharya, Asutosh Professor

of Sanskrit, Calcutta University. But for a few omissions and additions it was found to be an accurate mirror of the original text. The translation to Tibetan has been prepared, as it is stated in the colophon at the end, by the translator, Sthiramati without the assistance of any Indian Pandit.

The names of works and authors referred to in the text and the additional passages found in the Tibetan version have been given in the appendices. The publication of the Tibetan text and the Sanskrit-Tibetan Bilingual Index has been deferred for lack of printing facilities. An English translation of the text is in preparation and will be published with criticial notes on the text.

The other work, *Vādasthānāni*, which is included in this volume, was also found in the palm-leaf Ms. copy of Mysore and is by Jitāri or Jitāripada, who lived, according to S. C. Vidyabhusan, between : 940-980 A. D. He is said to have written, *Hetutattvopadesa*, *Bālāvatāratarka Dharmadharmiviniścaya.* In the list of manuscripts examined by Rev. Rahulasankrityayana in the Buddhist Monasteries in Tibet are found only two works, *Dharmadharmiviniscaya* : *Nairatmyasiddhi* ascribed to Jitāri.

I desire to acknowledge my indebtedness to the Oriental Institute, Mysore for allowing me to use its Ms. without which I could not have proceeded with the work. I express my gratitude to Mahamahopadhyaya V. Bhattacharya, for his invaluable help in supplying me with a transcript of the Tibetan text which has been very useful in preparing this edition of the text. Lastly, I feel grateful to the University of Mysore for granting a subvention for the publication of the first edition of the work.

V. V. MOHALLA, MYSORE, H. R. R. IYENGAR.

## Some Opinions

Dear Mr. Rangaswamy Iyengar,

I write to thank you for your kindness in giving me a copy of the '*Tarka-bhasha*' of Mokshakara Gupta, which you have recently published. I have read it with much interest. Great credit is due to you for tracing the sanskrit original of this old and important work of Buddhistic Logic and basing your edition on it. It is a valuable addition to the very small number of books in Sanskrit that we now have on the subject.

Mysore,
25-10-1944.

M. Hiriyanna,
*Professor of Sanskrit* (*Rtd.*)

V. V. Mohalla, Mysore.
18th Dec. 1944.

Dear Mr. Rangaswamy Iyengar,

Though Hindu Logicians have advanced very far in their field, yet we find that from the modern standpoint there is much to be learnt

from the Buddhist Logicians. You have done a great service in bringing to light the ancient Buddhistic works, '*Tarkabhasha*' of Mokshakara Gupta and '*Vadasthana*' of Jitaripada, which would probably have been completely forgotten, if you had not taken so much pains to unearth them. Your scholarly investigation, with your admirable knowledge of Tibetan, has helped you to make out the true readings wherever possible in the old and illegible manuscripts. You deserve the most warm congratulations on this publication also, though you have already shown how capable you are, by publishing your splendid edition of Dinnaga's '*Pramaṇa Samuccaya.*'

In Southern India, we have hardly another person with similar attainments and similar literary work to his credit, which have been so well appreciated by scholars of eminence.

With best wishes to you,

I am,

Yours Sincerely

(Sd.) Subrahmanya Iyer.

*Registrar, (Rtd.)*

*University of Mysore.*

"This book contains two separate works. The first one, Takabhasha, is a treatise on the source of valid cognition (Pramana) written after Buddhist Logicians, like Dinnaga and Dharmakirti. It tries to explain lucidly Buddhist theories of perception and inference, and also to refute the arguments of other schools which admit other additional sources of knowledge. In the light of this work one can understand better some of the knottiest points in Dinnaga's great logical work, 'Pramana Samuccaya', e. g., his peculiar conception of mānasapratyaksa (mental *perception*, not mental *sensation*, as the editor translates it in the preface, p. iv). The special value of the new edition lies in the fact that it is based on the Tibetan version in addition to three Sanskrit manuscripts. The editor deserves, therefore, to be thanked by all the students of Buddhistic Logic.

The second work, 'Vadasthana', by Jitaripada, contains a refutation of Jativada (the theory of universals), and of anekantavada (the Jain theory of manysided reality) from the Buddhist point of view. It is a very short but interesting treatise."

—Journal of the Bihar Research Society.

"Buddhism is familiar with the systems of logical thinking developed in the schools of Nyaya and Vaiseshika, and being itself born in India, has often used the same trend of reasoning against Hindu philosophical systems with as much force as orthodox systems have refuted Buddhist logic. The disappearance of Buddhism in the land of its birth due to a variety of causes has helped in an apathy for the preservation of Buddhist literature, while the zeal of Tibetan monks preserved many works on Buddhist logic (translated into Tibetan from the original) which are now otherwise lost from their Sanskrit original. The Adyar Library has published the 'Bhavasankaranti sutra' with the Bhavasankaranti 'sastra' as also the Alambanapariksha of Dinnaga in Sanskrit, as restored from their Tibetan originals. The tours of the Rev. Rahula Sankrityayana in Tibet have also brought to light the existence of palm-leaf manuscripts in the South Indian 'grantha' script in Tibetan monasteries. That Tibet has preserved such important works was noticed long ago, but due to the lack of interest of South Indian Universities. This sphere of study has been greatly neglected in our part of the country, whereas the University of Calcutta has made several important and lasting contributions on this subject.

The 'Tarkabhasha' of Mokshakara Gupta will probably have shared the fate of the other lost works, but was fortunately preserved in the Oriental Institute, Baroda, which published an edition of the work under the editorship of Sri Embar Krishnamacharya in 1942 from a collection of three manuscripts made available to him. Nevertheless, the present edition of the work is a welcome addition as it represents the Sanskrit text of a fresh manuscirpt acquired by the Mysore Library in Kannada script and Tibetan version of the text. Advantage has also been taken of the previous edition from Baroda and a comparison of the two clearly shows the difference between the two. The very first verse of the work may be cited as an example. Every page shows important variations from the Baroda text and hence the justification for a second edition of the work. Omission of several passages by the Baroda edition and the additional passages found in the Tibetan version should not be missed.

The work itself, though only in three chapters, deals with 'pratyaksa', 'anumana' and a detailed exposition of inference for others, or 'parathanumana'—syllogistic reasoning,and explains the theories of logic and epistemology

according to the tenets of Dharmakirti. The work of Mokshakara Gupta, in trying to refute the criticisms levelled against Buddhism by orthodox writers, uses the same arguments against the opponents with much force. That work was written with a view to vindicate the faith of the Buddha and for the good of the world and the propagation of the Buddhist culture.

The 'Vadasthana' of Jitari is included as it was found in the manuscript acquired by the Mysore Library. While Jitari is already known as the author of several works and the 'Jati-vada' is already published with lacunae by Prof. G. Tucci (in the BROS Vol XI. p. 54 ff.) real credit should be given to the editor of this work for bringing to light another work of Jitari, namely 'Anekantavada' which is included in the present work.

Mr. Rangaswamy Iyengar deserves to be congratulated for the work he has brought out. The appendices are useful and exhaustive.

—*The Indian Express.*

'Logic being a double-edged weapon which would sharply cut both ways, the Buddhistic thinkers, in the progressive conflict and evolu-

tion of Indian Philosophical systems, made free and extensive use of the technique of Nyaya-Vaiseshika to contravert and discredit the conclusions of other schools, especially Brahmanical schools, and contribution made by Buddhistic thinkers to the literature on Logic has been remarakble for depth and profundity of thought. The "Tarkabhasha" of Mokshakara Gupta, hitherto believed to be extant only in Tibetan renderings, was secured by a travelling Pandit as a gift to the Mysore Oriental Library. This and other particulars are detailed in the 'Preface' to the volume under notice which contains the Sanskrit text of Mokshakara Gupta's "Tarkabhasha" and Jitari's "Vadasthana" edited by Mr. H. R. Rangaswamy Iyengar, with the help of palm-leaf manuscripts. It may be noted that "Tarkbhasha' has already been published in the Gaekwad Oriental Series (1942) but the present text, edited in the light of the Mysore manuscript, is bound to be useful for comparative study.

From the philosophical standpoint the work under notice constitutes a serious and sustained attempt at vindications of the central concepts and conclusion of Buddhism. Freedom of philosophical speculation and expression was

absolutely unfettered in those days of magnificent militant metaphysics of Indian thinkers and system-builders. It would be a mistake to suppose that Brahmanical concepts and conclusions were forced down the throat of an unwilling or unintelligent public. Mokshakaragupta pays his opponents in their own coin. If certain systems like the Nyaya-Vaiseshika use logic to establish or prove the existence of God, Mokshakara turns the same logic to disprove and demolish theistic proofs for the existence of an intelligent Creator of the Cosmos. I would invite the attention of readers to the striking passage on page 57, in which short shrift is sought to be made of the celebrated Nyaya-Vaiseshika inference or inferential argument that the Cosmos considered qua effect must have an intelligent Cause or Creator. It may not be out of place to add that the refreshing and unfettered freedom of thought and experssion revealed by this and other incisive passages must permanently silence the disingenuous criticism that in ancient India philosophical systems and doctrines were made to order by this or that privileged community.

The second work is "Vadasthana" of Jitari, which just contains two sections. In the first

the theory of universals (Jativada) is severely criticised. The contentions of Nyaya-Vaiseshika (Uddyotakara) and Sankhya are fairly elaborately cited and examined. The Jaina doctrine of 'Anekanta-vada' (multi-predicability of any given subject) is refuted in the second. Evidently, the work as it stands, is incomplete, as only two sections, each containing a major topic, have been made available. The publication does undoubted credit to Mr. H. R. Ranga Swamy Iyengar.

R. NAGARAJA SARMA.
—*The Hindu*

# BIBLIOGRAPHY


1 History of Indian Logic, by S. C. Vidyabuhusan.

3 Buddhist Logic, by Prof. Scherbotskey.

3 Journal of the Bihar and Orissa Research Society Vols. XXI & XXII.

4 Āptamīmāmsa.

5 Nyāyabindu with the Tīka of Dharmottara (NB)

6 Nyāyamanidīpika (Palm-leaf Manuscript).

7 Nyāya Vārtika of Uddyotakara—Benares Edition.

8 Nyāyavartika Tātparyatīka of Vacaspati ,,

9 Pramāṇa Samuccaya with the Vṛtti of Diṅnāga.

10 Pramāna Vārtika of Dharmakrīti—(PV.) (Bors).

11 Pramāṇa Vārtika Vṛitti— (PVV.) ,,

12 Sloka Vārtika with the Tīka—Benares Edition.

13 Saddarśana Samuccaya with the Tika—Bombay.

14 Tattvasangraha with the Pañcika (TS.)—(Gos).

15 The Tarka Bhaṣa of Kesavamisra—Bombay Edition.

16 Vijnaptimatrata Siddhi (VS.)—Paris.

17 Vākyapadīya (V)—Benares Edition,

18 The Tarka Bhaṣa of Yaśovijaya—Bombay Edition.

19. Pramaṇa Viniścaya of Dharmakirti in Tibetan.

20. Vadanyaya of Dharmakirti.

# विषयानुक्रमणी

## प्रथमः परिच्छेदः


| | |
|---|---|
| मङ्गलाचरणम् | १ |
| प्रमाणसामान्यलक्षणम् | १-४ |
| प्रमाणस्य द्वैविध्यम् | ४ |
| प्रत्यक्षशब्दनिर्वचनम् | ४ |
| अनुमानशब्दनिर्वचनम् | ४ |
| प्रमाणसंख्याविप्रतिपत्तिः | ५ |
| चार्वाकाभिमतानुमानाप्रामाण्यनिरसनम् | ५ |
| शब्दोपमानार्थापत्त्यभावानां प्रमाणान्तरत्वनिरसनम् | ६-११ |
| प्रत्यक्षलक्षणम् | ११-१२ |
| कल्पनाभ्रमयोः प्रत्यक्षत्वनिरसनम् | १२-१४ |
| चित्तचैत्तानां स्वसंवेदनत्वसमर्थनम् | १७-१९ |
| योगिप्रत्यक्षनिरूपणम् | १९-२१ |
| प्रत्यक्षस्य स्वलक्षणविषयत्वसमर्थनम् | २१-२२ |
| प्रमाणफलव्यवस्था | २२-२३ |


## द्वितीयः परिच्छेदः


| | |
|---|---|
| अनुमानस्य द्वैविध्यम् | २४ |
| स्वार्थानुमानलक्षणम् | २४ |
| लिङ्गस्य त्रिरूपत्वम् | २४-२७ |
| कार्यस्वभावानुपलब्धिहेतोर्निरूपणम् | २७-३४ |


## तृतीयः परिच्छेदः


| | |
|---|---|
| परार्थानुमानलक्षणम्, तस्य द्वैविध्यम् | ३५ |

| | |
|---|---|
| स्वभावहेतोस्साधर्म्यवत्प्रयोगनिरूपणम् संस्कृतस्य सर्वस्य क्षणिकत्वसमर्थनं च | ३४-३७ |
| स्वभावहेतोर्वैधर्म्यवत्प्रयोगनिरूपणम् | ३७-३८ |
| कार्यहेतोः साधर्म्यवद्वैधर्म्यवत्प्रयोगनिरूपणम् | ३८ |
| अनुपलब्धेस्साधर्म्यवद्वैधर्म्यवत्प्रयोगनिरूपणम् | ३८-३९ |
| पराङ्गीकृतेश्वरसाधकानुमानस्य निरसनम् | ३९-४१ |
| त्रिलोचनाभ्युपगतस्य वह्निधूमयोः स्वाभाविकसम्बन्धवादस्य निरसनम् | ४१-४४ |
| ईश्वरसाधकानुमाने अनुपपत्तिः | ४४-४६ |
| साधर्म्यवैधर्म्यप्रयोगेषु त्रैरूप्यासिद्ध्याशङ्का तन्निरसनं च | ४६ |
| व्याप्तिग्राहकप्रमाणनिरूपणम् | ४७ |
| हेत्वाभासनिरूपणम् | ४७-५२ |
| अपोहनिरूपणम्, सामान्यनिरसनं च | ५२-५७ |
| ईश्वरसाधननिरसनम् | ५७-६० |
| सत्त्वानां शुभकर्मणः जगतः कारणत्वसमर्थनम् | ६० |
| सर्वज्ञसमर्थनम्, भवपरम्परासमर्थनं च | ६०-६३ |
| वैभाषिकसौत्रान्तिकमतनिरूपणम् | ६३-६४ |
| आत्माकाशकालदिङ्मनसां निरसनम् | ६४-६६ |
| अवयविनिरसनपूर्वकं परमाणुमात्रसमर्थनम् | ६६-६८ |
| निरालम्बनवादः | ६८ |
| विज्ञानस्य साकारत्व निराकारत्व पक्षभेदः | ६९-७१ |

# तर्कभाषा

गुरुं प्रणम्य लोकेशं शिशूनामल्पमेधसाम् ।
धर्मकीर्तिमतश्रुत्यै[1] तर्कभाषा प्रकाश्यते ॥

इह खलु प्रेक्षापूर्वकारिणोऽर्थिजनास्सर्वपुरुषार्थसिद्धिनिमित्तं प्रमाणमनुसरन्तीति प्रमाणमादौ व्युत्पाद्यते ।

प्रमाणं सम्यग्ज्ञानमपूर्वगोचरम् । प्रमीयतेऽर्थोऽनेनेति प्रमाणम् । तदेव सम्यग्ज्ञानम्, सन्देहविपर्यासदोषरहितत्वात् । अविसंवादकं ज्ञानं लोके सम्यग्ज्ञानमभिधीयते । न च संशयविपर्यासज्ञानयोरविसंवादकत्वमस्ति । यथा स्थाणुर्वा पुरुषो वेतिज्ञानस्य, मरीचिकासु वा जलज्ञानस्य। अपूर्वो गोचरो अस्येत्यपूर्वगोचरम् । गोचरो विषयो घटादिः । तस्मादुत्पन्नं तदर्थप्रापणयोग्यं ज्ञानं प्रमाणम् ॥

ननु ज्ञानं कर्तृ पुरुषं प्रयोज्यमर्थं कर्मभूतं यदि कदाचिन्न प्रापयति तत्कथमप्रापकत्वात् प्रमाणं स्यात्? उच्यते । न हि ज्ञानेन पुरुषो गले पादुकान्यायेन बलादर्थं प्रवर्तयितव्यः । अपि त्वेवंभूतमिदं वस्तुस्वरूपं नान्यथेत्यनेनाकारेण निश्चयो जनयितव्यः । स चेत्तेन कृतः, एतावतैवास्य प्रामाण्य-

[1] T. Chogs. kyi. grags. pa'i. lugs. mñan. phyir. M. श्रोतुं.

मविरुद्धम्। पुरुषस्तु तत्र प्रयोजनवशात् प्रवर्ततामृते प्रयोजनं न प्रवर्तताम्, अर्थो वा योगिपिशाचादिभिरपह्रियताम्। ज्ञानस्य किमायातम्? ॥

नन्वविसंवादकत्वेन ज्ञानस्य प्रामाण्यम्। अविसंवादकत्वं च दृष्टार्थप्रापणात्। न च यद्दृष्टं तत्प्राप्यते, क्षणिकत्वात्[1]। किंच रूपं दृष्टं, प्राप्यते च स्प्रष्टव्यम्। ततोऽन्यद्दृष्टमन्यत् प्राप्यत इत्यप्रतीतप्रापणात् कथं प्रामाण्यमस्य संगच्छताम्। न। यदि नाम वस्तुतोऽन्यदेव प्राप्यते तथापि दृष्टमेव मया प्राप्तमित्येकत्वाध्यवसायात् प्रतीतप्रापणमभिधीयते। यत्तु मरीचिकादिजलज्ञानं तदप्रापणयोग्यत्वादप्रमाणमेव॥

नन्विदं प्रापणयोग्यमिदं नेत्यर्थक्रियाप्राप्तिमन्तरेण निश्चेतुमशक्यम्। ज्ञानोत्पत्तिमात्रेण तु न भ्रान्ताभ्रान्तयोर्भेदोऽवधार्यते। ततश्च कथं तत्सम्यग्ज्ञानमिति चेत्। नैष दोषः। यद्यपि ज्ञानमात्रोदयाद्वैशिष्ट्यमनयोरवधारयितुं न शक्यते। तथापि ज्ञानविशेषोदयाद्यथैकस्य वैशिष्ट्यं तथोच्यते। तथा हि-यदि नाम मन्दबुद्धिरुत्पत्तिवशादविसंवादकत्वं ज्ञानस्य नावधारयितुं समर्थः, तथापि दाहपाकावगाहनस्नानपानोन्मज्जनाद्यर्थक्रियां दूरतोऽनुभवतो नरस्य दर्शनेनोच्चलद्धूमादिदर्शनेन चावधारयति। अमन्दबुद्धिस्तु पटुतरप्रत्यक्षेणैवावधारयति, न त्वर्थक्रियाप्राप्त्या। यद्यविसंवादलक्षणं प्रामाण्यं

---

[1] T, Gos.—यद्दृष्टं तत्प्राप्यते अक्षणिकत्वात्।

तत्र। [1]श्रोत्रज्ञानस्याधिगतार्थाप्रापकत्वात् कथं प्रामाण्यमिति चेन्न। [2]अर्थस्वरूपप्रतीतिर्हि प्रामाण्यम्। तच्च बाह्यार्थक्रिया-[3]प्राप्तिमन्तरेणापि सम्भवति। यदुक्तम्, [4]'प्रमाणमविसंवादि ज्ञानमर्थक्रियास्थितिः॥ अविसंवादनम्' इति। शब्दस्य श्रुतिमात्रेणैव चरितार्थत्वात् श्रुतिरेव तत्रार्थक्रियास्थितिः। यथा रविचन्द्राम्बुदचित्रादीनां दर्शनमेवार्थक्रियास्थितिः। तदुक्तम्—[5]'ज्ञेयस्वरूपसंवित्तिरिष्टा तत्र क्रियास्थितिः' इति। [6]प्रथमं तु प्रेक्षावानर्थक्रियार्थितया जलानलादावर्थक्रियासन्देहादेव प्रवर्तते। यदि नाम तस्यैव नास्ति सन्देहो मे वर्तत इति तथापि साधकबाधकप्रमाणाभावाद्युक्तः सन्देहो भवन् केन वार्यते इति। तस्मात् स्थितमेतत्—आसादितनिरन्तरार्थक्रियाव्यवहारात्पटुतरप्रत्यक्षोदयादेवार्थे प्रवर्तते मन्दबुद्धिस्तु ताद्रूप्यानुमानादिति। अत एव तु प्रत्यक्षस्य स्वतः प्रामाण्यम्। कस्यचित्तु परतः। योगिज्ञानस्य स्वसंवेदनस्य च स्वत एव प्रामाण्यम्। अनुमानस्य तु निश्चयात्मकत्वात् स्वत एव प्रामाण्यम्। तेनायमर्थः—प्रथमत एव यद्विज्ञानं विषये प्रवृत्तं तदेव प्रमाणम्। न तु तत्रैव पश्चाद्भावि ज्ञानान्तरमपि। गृहीतग्राहि-

---

[1] Gos. श्रवण. [2] Gos. अर्थस्वभावनिर्धारणस्य प्रामाण्ये. [3] Gos. प्रापणाभावेऽपि कदाचित्सत्त्वात्. [4] Cf. Pramanavartika II. 1. [5] Gos. ज्ञेयस्वरूपविद्यैव तत्रेष्टार्थक्रियास्थिता. [6] Gos. प्रथमतः.

त्वेन तस्याप्रामाण्यात् । यथा घटं निर्विकल्पकेन ज्ञानेन दृष्ट्वा पश्चात्तस्मिन्नेव विषये घटोऽयमिति सविकल्पकं ज्ञानं स्मरणरूपम् । यथा वा पर्वतादौ धूमं दृष्ट्वा वह्निरत्रेत्यनुमानज्ञानानन्तरं पुनरपि तत्रैव वह्निरत्रेत्यनुमानज्ञानम् । सम्यग्ज्ञानं प्रमाणमित्युक्ते सामर्थ्याज्जडस्वभावस्येन्द्रियादेः परिच्छेदकत्वाभावात् प्रामाण्यं निरस्तम् । परिच्छेदकत्वं हि बोद्धृत्वम् । तच्च ज्ञानस्यैव निजरूपम् । तत्कथमज्ञानात्मन इन्द्रियादेः स्वरूपं भवितुमर्हतीति ॥

तद्द्विविधं प्रत्यक्षमनुमानं चेति । प्रतिगतमक्षं प्रत्यक्षम् । अक्षमिन्द्रियं चक्षुःश्रोत्रघ्राणजिह्वाकायाख्यम् । तस्मादुत्पन्नं ज्ञानं प्रत्यक्ष [1] मभिधीयते । ननु यद्यक्षाश्रितं ज्ञानं प्रत्यक्षं तदा मानसादि वक्ष्यमाणं ज्ञानत्रयमिन्द्रियादनुत्पत्तेः प्रत्यक्षं न स्यात् । अत्रोच्यते—प्रतिगतमक्षमिति यदुक्तं तत्प्रत्यक्षशब्दस्य व्युत्पत्तिमात्रनिमित्तं प्रतिपादितम् । प्रवृत्तिनिमित्तं तु प्रत्यक्षशब्दस्यार्थसाक्षात्कारित्वमेव रूढिवशादवगन्तव्यं पङ्कजवत् । ततः स्वसंवेदनादिकमपि ज्ञानं स्वसंवेदनरूपमर्थं साक्षात्करोतीति प्रत्यक्षशब्दवाच्यं सिद्ध्यतीति ॥

मीयतेऽर्थोऽनेनेति मानम् । अनुः पश्चादर्थे । पश्चान्मानमनुमानम् । लिङ्गग्रहणलिङ्गलिङ्गिसम्बन्धस्मरणयोः पश्चात्

---

[1] Gos; T. मित्यर्थः.

यद्विज्ञानं पर्वतादौ धर्मिणि परोक्षवस्त्वालम्बकं तदेवानुमान-शब्देनाभिधीयते। एतच्च रूढिवशादवगन्तव्यम्।

द्विविधवचनेन एकं त्रीणि चत्वारि पञ्च षडिति विप्रतिपत्तयो निरस्यन्ते। तथा हि-प्रत्यक्षमेवैकं प्रमाणमिति चार्वाकः। प्रत्यक्षमनुमानं शाब्दं चेति सांख्यः। प्रत्यक्षमनुमानमुपमानं शाब्दं चेति नैयायिकः। प्रत्यक्षमनुमानं शाब्दमुपमानमर्थापत्तिरिति प्राभाकरः। प्रत्यक्षमनुमानं शाब्दमुपमानमर्थापत्तिरभावश्चेति मीमांसकः।

द्विविधवचनेन द्वित्वे प्राप्ते प्रत्यक्षमनुमानं चेति पुनर्यदुक्तं तदन्यथाद्वित्वनिरासार्थम्। तथा हि वैयाकरणो ब्रूते प्रत्यक्षं शाब्दं चेति प्रमाणद्वयम्[1]।

तत्र अनुमानस्य प्रामाण्यमवश्यमभ्युपगन्तव्यं चार्वाकेणेति प्रतिपाद्यते। तथाहि—स खलु प्रत्यक्षलक्षणं परप्रतिपादनाय प्रणयति। परस्य च बुद्धिर्न प्रत्यक्षा। किं तर्हि कायवाग्व्यापारादिकार्यादनुमेया। ततोऽनेन कार्यलिङ्गजमनुमानं बलाद[2]भ्युपगतं स्यात्। परलोकनिषेधाय चानुपलम्भाख्यं साधनमाचष्टे। अतोऽसौ स्वयमेवानुमानेन प्रमाणेन व्यवहरति, नानुमानं प्रमाणमिति च[3] ब्रुवन् कथं नाम नोन्मत्तश्चार्वाकः स्यात्?

---

[1] Gos. Here is quoted the following Sloka—

प्रमाणेतरसामान्यस्थितेरन्यधियो गतेः।
प्रमाणान्तरसद्भावः प्रतिषेधाच्च कस्यचित्॥

It is not found in T. and M.

[2] Gos. अभ्युपेतं, [3] Gos. ब्रुवाणः कथं नोन्मत्तः.

शाब्दं च ज्ञानं बाह्यार्थाविसंवादकत्वेन प्रमाणमेष्टव्यम्। अविसंवादकत्वं च सम्बन्धमन्तरेण न [1]संगच्छते। न च शब्दानां बाह्यार्थेन सह कश्चित्सम्बन्धोऽस्ति। तथा हि—शब्दार्थयोः सम्बन्धो भवन् तादात्म्यं तदुत्पत्तिर्वा भवेत्। तत्र न तावत्तादात्म्यं शब्दार्थयोः, अत्यन्तभेदेन प्रतिभासनात्। तादात्म्यं ह्येकत्वमभिधीयते। भिन्नप्रतिभासयोरप्येकत्वे स्वीक्रियमाणे गवाश्वादीनामप्येकत्वप्रसङ्गः। नापि तदुत्पत्तिः। अन्वयव्यतिरेकाभावात्। तस्मात् तदुत्पत्तिरित्येवं वक्तुं न शक्यते। तथा हि—शब्दव्यापारमन्तरेण स्वहेतोरेव मृत्पिण्डदण्डसलिलकुलालचक्रादेः सकाशादुत्पद्यमानो घटादिरर्थो दृश्यते। शब्दोऽपि बाह्यार्थं विनैव पुरुषेच्छामात्रेण ताल्वादिव्यापारादेवोत्पद्यते। अथ तादात्म्यतदुत्पत्तिभ्यामन्य एव वाच्यवाचकत्वलक्षणः शब्दार्थयोः [2]वास्तवः सम्बन्धोऽस्ति। एवं तर्ह्यसङ्केतविदोऽपि [3]पुरुषस्य शब्दादुच्चरितान्नियतार्थप्रतीतिः प्राप्ता, योग्यतामात्रेणैव प्रदीपात् घटादिप्रतीतिवत्। न चैतदस्ति। तथा हि—अभिनवो नालिकेरद्वीपादायातः पुमानग्निशब्दं श्रुत्वाऽप्यग्निशब्दान्न किञ्चिदर्थं प्रत्येतीति। अथ तांस्तान्सङ्केतानपेक्ष्य तत्तदर्थप्रत्यायनयोग्य एवायं शब्दो जायत इत्युच्यते। तन्न। न ह्येवमस्य प्रामाण्यमवतिष्ठते। सर्वत्र

---

[1] Gos. सम्भवति। [2] Gos. स्वाभाविकःप्रतिबन्धो
[3] Gos. प्रमातुः.

सङ्केतस्य योग्यत्वात्। ततो न ज्ञायते किं विवक्षितार्थमाह, आहो स्विदन्यं वेति। अस्तु वा अन्य एव कश्चित्सम्बन्धः। तथा च सोऽपि केन सम्बन्धेन तयोः सम्बद्ध इति प्रष्टव्यः। अन्येन चतुर्थेन सम्बन्धेनेति चेत्, चतुर्थोऽपि तेषु केन सम्बन्धेन सम्बद्धः? पञ्चमेन केनचिच्चेत्, सोऽपि केनेत्यनवस्थायां अन्त्यासिद्धौ पूर्वेषामप्यसिद्धिः। अथासम्बद्ध एव शब्दार्थयोः सम्बन्ध इति चेत्। तन्न। यो न सम्बद्धः स कथं सम्बन्धो भवति घटस्येव पटः। अथ वक्तव्यं सम्बन्धस्य तादृश एव स्वभावः, येन सम्बन्धान्तरनिरपेक्ष एव परं सम्बध्नाति। तदयुक्तम्। प्रमाण [1]सिद्धे हि स्वभावे लोकैरभिधीयते। यथाऽग्नेरेवायमीदृशः स्वभावो यदुत दाहकत्वं नाम नान्यस्याकाशादेः। सम्बन्धसिद्धौ तु प्रमाणं किञ्चिन्निरूपयन्तो न पश्यामः। न चैवं वक्तव्यं शब्दशक्तिस्वभावादेव शब्दानां नियतार्थाव्यभिचारित्वमिति। तथा हि—यदि घट इत्ययं शब्दः स्वभावादेव कम्बुग्रीवाकारं वारिसंधारणसमर्थं पदार्थमभिदधाति, तत्कथं सङ्केतान्तरमपेक्ष्य पुरुषेच्छया तुरगादिकमभिदध्यात्। न हि शालिबीजं स्वहेतोरङ्कुरजननस्वभावमुत्पन्नं सङ्केतान्तरमपेक्ष्य गर्दभं जनयितुं समर्थं स्यात्। नाप्याप्तप्रणीतशब्दानां प्रामाण्यमभिधातुमुचितम्। आप्तत्वस्यैव निश्चेतुमशक्यत्वात्। तथा हि—आप्तत्वं क्षीणदोषत्व-

---

[1] Gos. सिद्धे हि वस्तुनि.

मुच्यते। क्षीणदोषता च परचित्तवृत्तिः काचिदभिधीयते। परचित्तवृत्तीनां दुर्लक्ष्यत्वात्, कायवाग्व्यापारादिकार्यलिङ्गस्यान्यथाऽपि [1]वृत्तिदर्शनात्। सरागा अपि वीतरागा इव चेष्टन्त इति न्यायात्कथमाप्तत्वं निश्चीयतामिति। सम्बन्धदूषणेन च वैदिकशब्दानां प्रामाण्यं निरस्तमिति पृथङ्नोक्तम्। कथं तर्हि सर्वोऽयमसन्दिग्धो लौकिको व्यवहार इति चेत्। तथा तथा सङ्केतेन विवक्षावशादिति न काचित् क्षतिः। यथोक्तम्-'वक्तुरभिप्रायं सूचयेयुः शब्दा' इति॥

नैयायिकस्योपमानप्रपञ्चः। यः प्रतिपत्ता गां [1]जानाति न गवयं, स च [2]अपदिष्टः स्वामिना अरण्यं गत्वा गवयमानयेति। स च गवयशब्दवाच्यमर्थमजानानो वनेचरमन्यं तज्ज्ञं पुरुषं पृष्टवान्, भ्रातः कीदृशो गवय इति। [3]स चाह [4]यादृशी गौस्तादृशो गवय इति। तस्यारण्यगतस्य प्रेष्यपुरुषस्य अतिदेशवाक्यार्थस्मरणसहकारि गवयसारूप्यज्ञानं कर्तृ अय[5]मसौ गवयशब्दवाच्योऽर्थ इति प्रतिपत्तिं फलरूपां जनयत्प्रमाणम्। एतच्चायुक्तम्। यत्प्रामाण्यं नाम विषयवत्तया व्याप्तम्। नचास्य निपुणमपि निरूपयन्तो विषयं [6]संपश्यामः। तथा

---

[1] Gos. सन्दर्शनात्. [2] Gos. वेत्ति. [3] Gos. आदिष्टः. [4] T. तेनोक्तं Gos. सं आह. [5] M. यादृशो गवयः Gos. यादृग्गौस्तादृग्गवयः [6] Gos. सः.

हि—समाख्या नाम सम्बन्धः तस्य विषयो वर्ण्यते। स च परमार्थतो नास्ति। दृश्यत्वे तस्यानुपलम्भेन बाधा। अदृश्यत्वे तस्य सत्तासाधकं प्रमाणं [1]नेक्ष्यते। किं च—स हि सम्बन्धः सम्बन्धिभ्यां भिन्नोऽभिन्नो वा। यदा भिन्नस्तदा तयोः सम्बन्धः [2]केन सम्बन्धेनेति वाच्यम्। सम्बन्धान्तरकल्पनाया-मनवस्था। अथाभिन्नस्तदा सम्बन्धिनावेव केवलौ। न समाख्या नाम सम्बन्धः कश्चित्। अथ सम्बद्धबुद्धिजनकत्वं [3]सम्बन्धः। तन्न युक्तम्। यतः सम्बद्धावेताविति बुद्धिः स्वहेतु-बलात् सम्बद्धवस्तुद्वयादपि सम्भाव्यमाना न सम्बन्धान्तर-माक्षिप्तुं प्रभवति॥

एवं मीमांसकोपवर्णितस्यापि प्रामाण्यं निराकर्तव्यम्। तथा हि, [4]सादृश्यविशिष्टः पिण्डः पिण्डविशिष्टं वा सादृ-श्यमुपमानस्य विषयस्तेन वर्ण्यते। न च सदृशवस्तुनोऽ-तिरिक्तं सादृश्यं व्यवस्थापयितुं शक्यते, प्रमाणेनाप्रतीतत्वात्। तथा हि—यदि सदृशादतिरिक्तं सादृश्यं दृश्यं स्यात्, तदा दृश्यानुपलम्भग्रस्तमेतत्। अथादृश्यं [6]तदा तत्प्रतिबद्धलिङ्गा-भावात् अनुमानादपि कथं तत्सिद्धिः। सादृश्यप्रत्ययस्तु स्वहेतोस्तथोत्पन्नेन सदृशवस्तुनाऽपि क्रियमाणो घटत इति

---

[1] Gos. पश्यामः. M. नेष्यते. [2] M. सम्बन्धेन सम्बद्धः. [3] M. सम्बन्धस्तस्योपवर्ण्यते. [4] M. नासादृश्यं. [5] Gos. तदपि M. तत्तथाऽपि.

न तत्प्रत्ययादपि तत्सिद्धिर्युक्ता। उपमानादेव सादृश्यसिद्धिरिति चेन्न। यतः प्रमाणान्तरसिद्धयोरेव सादृश्यपिण्डयोर्यो विशेषणविशेष्यभावस्तस्योपमानविषयत्वं तेन वादिना परिकल्प्यते। तत्कथं सादृश्यमात्रस्याप्यु[1]पमानात्सिद्धिरिति॥

अर्थापत्तेरपि प्रामाण्यं पृथङ् नोपपद्यते। तथा हि प्रत्यक्षादिप्रतीतो योऽर्थः स येन विना नोपपद्यते तस्यार्थस्य कल्पनमर्थापत्तिरित्यर्थापत्तेर्लक्षणम्। अत्रेदं [3]चिन्त्यते—योऽसौ प्रमाणदृष्टोऽर्थः तस्य यदि परिकल्प्यमानेन [4]परोक्षार्थेन सह कश्चित्तादात्म्यलक्षणः तदुत्पत्तिलक्षणो वा प्रतिबन्धोऽस्ति तदा स्वभावलिङ्गजा कार्यलिङ्गजा वाऽसौ [5]प्रतिपत्तिरित्यर्थापत्तिरनुमानमेव। अथ नास्ति प्रतिबन्धः [6]तदानीमर्थापत्तिः प्रमाणमेव न भवति। असम्बन्धात् घटात्पटप्रतीतिवदिति॥

**अभावस्य स्वरूपमेव ताव[7]न्नोपलभामहे, कुत एव तस्य प्रामाण्यं भविष्यति। तथा हि—[8]प्रत्यक्षादिप्रमाणानामनुत्पत्तिरभावाख्यं प्रमाणं मीमांसकैरभिधीयते। तत्र केयमनुत्पत्तिः? किं प्रसज्यवृत्त्या प्रमाणानुत्पत्तिमात्रं? अथ पर्युदासवृत्त्या**

---

[1] Gos. पमानासिद्धिः. [2] T. परिकल्पनम्. [3] T. चिन्त्यम्. [4] Gos. परोक्षेणार्थेन. [5] Gos. प्रतीतिरनुमानमेव. [6] Gos. तदा T. has neither तदा nor तदानीं. [7] Gos. न वीक्षामहे. [8] Gos. प्रत्यक्षादीना.

वस्त्वन्तरम् ? वस्त्वन्तरमपि जडरूपं, ज्ञानरूपं वा ? ज्ञानमपि किं ज्ञानमात्रम् एकज्ञानसंसर्गिवस्तुनो ज्ञानं वा ? तत्र न तावत् प्रसज्यरूपोऽभावो युज्यते । तस्य सर्वशक्तिशून्यत्वात् परिच्छेदकत्वं ज्ञानजनकत्वं वा कथं भवेत् ? अत एव केनापि [1] न तत्प्रतिपद्यते । यदाह पण्डितचक्रचूडामणिः—[2] 'नाभावः कस्यचित्प्रतिपत्तिः प्रतिपत्तिहेतुर्वा । तस्यापि कथं प्रतिपत्तिः' इति । नापि जडरूपं, जडस्य परिच्छेदकत्वाभावात् । न हि जडरूपं शकटादिकं घटं परिच्छिनत्तीति क्वापि दृष्टं श्रुतं वेति । नापि ज्ञानमात्रं, देशकालस्वभावविप्रकृष्टस्यापि सुमेरुशंखचक्रवर्तिपिशाचादेरपि ज्ञानमात्रादभावप्रमाणादभावप्रसङ्गात् । अथैकज्ञानसंसर्गिभूतलादि [3] वस्तुज्ञानमभावोऽभिधीयते. तदा प्रत्यक्षविशेषस्यैवाभावप्रमाणनामकरणान्नास्माकं काचिद्विप्रतिपत्तिरिति । स्थितमेतत्—प्रत्यक्षमनुमानं चेति द्विविधमेव प्रमाणमिति ॥

तत्र प्रत्यक्षं कल्पनापोढमभ्रान्तम् । पूर्वापरमनुसन्धाय शब्द [4] सङ्कीर्णाकारा प्रतीतिरन्तर्जल्पाकारा वा कल्पना । [5] यथा विज्ञपुरुषस्य सोऽयं घट इति प्रतीतिः । बाल [6] मूकतिर्यगा-

---

[1] Gos. तत्प्रतिपद्येत M. तत्प्रतिपद्यते, [2] Gos. न ह्यभावः. [3] M. वस्त्वन्तर. [4] Gos. संयुक्तकारा. [5] These two lines occur in Gos after. .तथा चोक्तम् . . . कल्पनेति. [6] Gos. मूकादीनां.

दीनामन्तर्जल्पाकारा परामर्शरूपा वा प्रतीतिः। तथा चोक्तम् "अभिलापसंसर्ग [1] योग्यप्रतिभासप्रतीतिः कल्पना" इति ॥

ननु बालमूकादीनामन्तर्जल्पाकारं कल्पनाज्ञानमस्तीति कुतो निश्चेतव्यमिति चेत्, विकल्प [2] कार्यादिष्टानिष्टोपादानपरिहारात्। दृष्टं चेदं कार्यं बालमूकादेः, ईप्सितार्थस्वीकरणमनीप्सितार्थत्यजनं नाम। बालमूकादिविज्ञानस्य कल्पनात्वसूचनेन भट्टोक्तालोचनाज्ञानं सविकल्पकमिति प्रतिपादितं भवति। किं पुनः कारणं कल्पनाविभ्रमात्मकं च ज्ञानं [3] प्रत्यक्षं न स्यादिति चेन्न। अर्थस्वरूपसाक्षात्कारि हि ज्ञानं प्रत्यक्षमिति सर्वेषां [4] प्रसिद्धम्। न च कल्पनाविभ्रमावर्थरूपं साक्षात्कर्तुं समर्थौ। तथा हि—अर्थग्राहकं ज्ञानमर्थस्य कार्यम्। अर्थो हि ग्राह्यत्वात् ज्ञानस्य कारणम्। यथोक्तम्—

"भिन्नकालं कथं ग्राह्यमिति चेत् ग्राह्यतां विदुः।
हेतुत्वमेव युक्तिज्ञा ज्ञानाकारार्पणक्षमम् ॥" इति ॥

कल्पनाज्ञानमर्थमन्तरेण वासनामात्रादेवोपजायमानं कथ [5] मर्थस्य कार्यं स्यात्। अर्थेन सह अन्वयव्यतिरेकाभावात्।

---

[1] M. योग्यार्थाकारा तु Gos. योग्यप्रतिभासा cf. N. B. I. 5. [2] Gos. कार्यस्येष्टानिष्टोपादानपरिहारस्योदयात्- [3] Gos. न प्रमाणमितिचेत्. [4] Gos. सम्मतम्. [5] Gos. मर्थकार्यं.

न हि यदन्तरेणापि यद्भवति तत्तस्य कार्यम्, अतिप्रसङ्गात्। यदि पुनः कल्पनाज्ञानमर्थादुपजायेत, तेनापि तदा घटादिरर्थो दृश्येत। ततश्चान्धस्यापि रूपदर्शनप्रसङ्गः, न चास्ति। अत एवोक्तम् 'शाब्द्यां बुद्धावर्थस्य प्रत्यक्ष इव प्रतिभासाभावात् नास्ति [1] कल्पनायाः अर्थसाक्षात्कारित्वम्' इति एतेन यदुक्तं [2] परेण—

**न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।**
**अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते॥ इति॥**

तन्निरस्तम्। तथाहि—घटे पुरोवर्तिनि उच्चार्यमाणे तत्समीपवर्ति भूतलादिज्ञानमुच्चारणरहितमनुभूयत एव। न च तथा तत्र शब्दानुगतो[3]ऽस्ति। न च विकल्पद्वयं सकृदिति न्यायात्॥

**भ्रान्तमपि ज्ञानं नार्थसाक्षात्कारि। भ्रान्तं ह्यर्थक्रिया समर्थे वस्तुनि विपर्यस्तमुच्यते। अर्थक्रियाक्षमं च वस्तुस्वरूपं देशकालाकारनियतं, तत्कथं विपरीतप्रतिभासिना भ्रान्तेन ज्ञानेन साक्षात्क्रियते। यदाह आचार्यः—"तिमिराशुभ्रमणनौयानसंक्षोभाद्यनाहितविभ्रमं ज्ञानं प्रत्यक्षम्" इति॥**

**एतेन कामलिनः शुक्ले शंखे पीतप्रतिभासि ज्ञानं, भ्रमादलातादौ चक्रादिनिर्भासि ज्ञानं, गच्छन्त्यां नावि स्थितस्य**

---

[1] T. कल्पनाज्ञानस्य. [2] M. and Gos. साङ्ख्येन. [3] M. न च तत्र तदनुगमो; Gos. न च तत्र शब्दानुगमो.

[1]चलद्वृक्षादिभ्रान्तिज्ञानं, गाढमर्मप्रहारहतस्य ज्वलत्स्तम्भादि प्रतिभासि ज्ञानं च, न प्रत्यक्षमित्युक्तं भवति । ननु यदि नाम तज्ज्ञानं न प्रत्यक्षं कथं ततो वस्तुप्राप्तिरिति चेत्, न ततो वस्तुप्राप्तिः । किं तर्हि, ज्ञानान्तरादेवेति केचित् ॥

तच्चतुर्विधं, इन्द्रियज्ञानं मानसं स्वसंवेदनं योगिज्ञानं चेति । चक्षुरादीन्द्रियपञ्चकाश्रयेणो[2]त्पद्यमानं बाह्यरूपादिपञ्चविषयालम्बनमिन्द्रियप्रत्यक्षम् । तत्र चक्षुर्विज्ञानं रूपविषयम् । श्रोत्रविज्ञानं च शब्दविषयम् । घ्राणविज्ञानं गन्धविषयम् । जिह्वाविज्ञानं रसविषयम् । कायविज्ञानं स्पर्शविषयम् । इन्द्रियप्रत्यक्षमिति व्यपदेशस्यासाधारणकारणत्वं निमित्तम् । यथा भेरीशब्दो यवाङ्कुर इति । इदं च प्रत्यक्षं यत्रैव स्वानुरूपं विकल्पं जनयति तत्रैव प्रमाणम्, सांव्यवहारिकप्रमाणाधिकारादिति ॥

**स्वविषयानन्तरविषयसहकारिणेन्द्रियज्ञानेन समनन्तरप्रत्ययेन जनितं मनोविज्ञानं [3]मानसम् ।** स्वशब्देनेन्द्रियज्ञानमभिमतम्, स्वस्य विषयो बाह्यो घटादिः, स्वविषयस्यानन्तरः स्वविषयानन्तरः इन्द्रियज्ञानविषयादन्यो घटादिद्वितीयक्षणः । तेन सहकारिणा सह मिलित्वा, इन्द्रियज्ञानेनोपादानेन समनन्तरप्रत्ययसंज्ञकेन यज्जनितं तन्मानसं प्रत्यक्ष-

---

[1] T. चलद्वृक्षादिग्राहि ज्ञानं; Gos. भ्रमद्वृक्षादिग्राहि. [2] Gos. त्पन्नं, [3] & Omitted in Gos.

[1] मुच्यते । ततो यदुक्तं परेणात्र 'गृहीतग्राहित्वमन्धबधिराद्यभावो योगिज्ञानस्यापि मानसत्वप्रसङ्गः अव्यवहारित्वं च इति' तन्निरस्तम् । तथा हि—द्वितीयक्षणग्रहणात् गृहीतग्राहित्वस्य निरासः । इन्द्रियज्ञानजनितं हि मानसम् । अन्धादीनां [2] रूपादिविषयालम्बनकमिन्द्रियज्ञानमेव नास्ति, कुतस्तज्जनितं मानसं भविष्यति ? अतो नास्त्यन्धबधिराद्यभावदोषः । समनन्तरप्रत्ययविशेषणेन मानसप्रत्यक्षप्रसङ्गो निरस्तः । समनन्तरप्रत्ययशब्दः स्वसन्तानवर्तिन्युपादानज्ञाने रूढ्या प्रसिद्धः । ततो भिन्नसन्तानवर्तियोगिज्ञानमपेक्ष्य पृथग्जनचित्तानां समनन्तरप्रत्ययव्यपदेशो नास्तीति । अव्यवहारित्वं पुनरस्य दूषणं नोपपद्यते, सूक्ष्मकालभावित्वेन पृथग्जनैर्दुर्लक्ष्यत्वात् । व्यवहाराङ्गत्वेन चानभ्युपगमात् । आगमप्रसिद्धं हि मानसप्रत्यक्षम् । न त्वस्य निश्चायकं किञ्चिदस्ति । यथोक्तं भगवता—'द्वाभ्यां भिक्षवो रूपं गृह्यते, कदाचित् चक्षुषा तदाकृष्टेन मनसा च' इति । ननु च व्यवहारानुपयुक्तमुपदर्शयितुं किं प्रयोजनम्, ईदृग्लक्षणयुक्तं यदि मानसं प्रत्यक्षं स्यात्, न कश्चिद्दोषः स्यादित्यागमस्यापि [3] विशुद्धिरनेन प्रतिपादितेति प्रयोजनम् ॥

सर्वचित्तचैत्तानामात्मसंवेदनं स्वसंवेदनम् । चित्तं वस्तुमात्रग्राहकं ज्ञानम् । [4] चित्ते भवाः चैत्ताः, वस्तुनो

---

[1] Omitted in Gos. [2] Gos. रूपाद्यालम्बनं. [3] Gos. शुद्धि.
[4] T. M. चित्तेन.

विशेषरूपग्राहका सुखदुःखापेक्षालक्षणाः। तेषां सर्वचित्तचैत्तानामात्मा संवेद्यते येन रूपेण तत्स्वरूपमात्मस्वरूपसाक्षात्कारित्वात् स्वसंवेदनं प्रत्यक्षं कल्पनापोढमभ्रान्तं चोच्यते। अत्र केचिदाहुः—न च चित्तचैत्तानां स्वसंवेदनं घटते, स्वात्मनि [1]क्रियाविरोधात्। न च सुशिक्षितोऽपि नटवटुः स्वस्कन्धमारोढुं शक्नोति। न हि तीक्ष्णाऽप्यसिधारा स्वमात्मानं छिनत्ति। न हि [2]प्रज्वलितोऽपि वह्निस्कन्ध आत्मानं दहति। तथा चित्तचैत्तमपि कथमात्मानं [3]वेदयतु! वेद्यवेदकभावो हि कर्मकर्तृभावः। [4]कर्मकर्तृत्वं च लोके भेदेनैव प्रसिद्धम्, वृक्षसूत्रधारयोरिव। अत्रोच्यते—न कर्मकर्तृभावेन वेद्यवेदकत्वं ज्ञाने वर्ण्यते। किं तर्हि व्यवस्थाप्यव्यवस्थापकभावेन। यथा प्रदीप आत्मानं प्रकाशयति तथा ज्ञानमपि जडपदार्थविलक्षणं स्वहेतोरेव प्रकाशस्वभावमुपजायमानं स्वसंवेदनं व्यवस्थाप्यते॥ [5]तथा चोक्तम्—

"विज्ञानं जडरूपेभ्यो व्यावृत्तमुपजायते।
इयमेवात्मसंवित्तिरस्य याऽजडरूपता"। इति[6]॥

---

[1] Gos. कारित्व. [2] Gos. सुप्रज्ज्वलतो. [3] Gos. प्रत्येतु. [4] Gos. स. च. [5] Gos. यथोक्तं न्यायवादिना. [6] T. has an additional sloka :—

क्रियाकारकभेदेन न स्वसंवित्तिरस्य तु।
एकस्यानंशरूपस्य त्रैरूप्यानुपपत्तितः॥

अलङ्कारकारेणाप्युक्तम्—

कल्पितः कर्मकर्त्रादिः परमार्थो न विद्यते ।
आत्मानमात्मनैवात्मा निहन्तीति [1] निरुच्यते । इति ॥

न च चित्तचैत्तानां ज्ञानान्तरेण प्रकाश्यत्वं युज्यते । तथा हि—न तावत्समानकालभाविना ज्ञानान्तरेण चित्तचैत्तं प्रकाश्यत इति घटते, उपकार्योपकारकत्वाभावात्, सव्येतरगोविषाणयोरिव । नापि भिन्नकालभाविना, क्षणिकत्वात् प्रकाशितव्यस्यैवाभावात् । अपि च यदि ज्ञानं स्वसंवेदनं न स्यात्, तदा ज्ञातोऽर्थ इति दुर्घटः स्यात्, 'नागृहीतविशेषणा बुद्धिर्विशेष्ये वर्तते' इति न्यायात् । तथा हि—अर्थो विशेष्यः, ज्ञात इति विशेषणम्, ज्ञातो ज्ञानेन विशेषित इति । ज्ञानं चेत्स्वयं न बोधरूपेण प्रतीतं, तत्कथं ज्ञानेन विशेषितोऽर्थः प्रतीयताम् । न हि दण्डाग्रहणे दण्डिनो ग्रहणं युक्तिसङ्गतम् । यच्चोक्तं त्रिलोचनेन—"चक्षुषोऽग्रहणेऽपि चाक्षुषं रूपं यथा प्रतीयते, तथा ज्ञानानवबोधेऽपि ज्ञातोऽर्थ इति घटिष्यते" इति तदसाधु । प्रस्तुतेऽनुपयोगात् । न हि चक्षू रूपस्य विशेषणम् । किं तर्हि, चक्षुर्विज्ञानम् । ततश्चक्षुर्विज्ञानासंवेदने कथं रूपं ज्ञायतामिति चोद्यमक्षतमेव ॥

---

[1] Gos. निरूप्यते.

*यत्पुनर्ज्ञानस्य परोक्षत्वप्रतिपादनाय[1] भट्टेनोक्तम्—यथा च रूपादिप्रकाशान्यथानुपपत्त्या इन्द्रियसिद्धिः, तथा ज्ञानस्यापि सिद्धिरिति। तथा हि तत्र भाष्यम्—'न हि कश्चिदज्ञातेऽर्थे बुद्धिमुपलभते। ज्ञाते त्वनुमानादवगच्छति' इति। वार्तिकं च 'तस्य ज्ञानं तु ज्ञाततावशात्' इति। ज्ञातता च विषयप्राकट्यमुच्यते। तदपि चायुक्तम्। प्राकट्यस्यापि ज्ञानात्पृथक्त्वे विषयरूपतायां व्यक्तौ जडरूपता, जडस्य प्रकाशायोगात्। विषयादर्थान्तरत्वे जडतायां तस्यापि स्वतः प्रकाशायोगात्। प्राकट्यान्तरेण तु प्रकाशनेऽनवस्था स्यात्। ज्ञानस्वभावत्वे प्राकट्यस्यापि परोक्षत्वप्रसङ्गः। ततोऽवश्यं ज्ञानस्य स्वसंवेदनत्वमभिधेयम्। अनुभवप्रसिद्धं च स्वसंवेदनत्वं कथमपह्नूयेत? तदुक्तम्—

'अप्रत्यक्षोपलम्भस्य नार्थदृष्टिः प्रसिद्ध्यति' इति।

अलङ्कारकारोऽप्याह—*

'परोक्षं यदि तत् ज्ञानं ज्ञातमित्येव तत्कुतः।
परोक्षस्य स्वरूपं कस्तस्य लक्षयितुं क्षमः॥' इति॥

ननु सर्वज्ञानानां स्वसंवेदनप्रत्यक्षत्वे घटोऽयमित्यादिविकल्पज्ञानस्य निर्विकल्पकत्वं, पीतशङ्खादिज्ञानस्याभ्रान्तत्वं च कथं न भवेत्? उच्यते—विकल्पज्ञानमपि स्वात्मनि निर्विकल्प-

* missing in Gos. 1. T. सिद्ध्यर्थं.

मेव। घटोऽयमित्यनेन बाह्यमेवार्थं विकल्पयति, न त्वात्मानम्। तदुक्तम्—

शब्दार्थग्राहि यद्यत्र ज्ञानं तत्तत्र कल्पना।
स्वरूपं च न शब्दार्थं तत्राध्यक्षमतोऽभिलपम्। इति॥

भ्रान्तमप्यात्मन्यभ्रान्तं स्वप्रकाशरूपेणैवावभासनात्। असद्विषयत्वाच्च भ्रान्तिरुच्यते। तदुक्तम्—

'स्वरूपे सर्वमभ्रान्तं पररूपे विपर्ययः'। इति *।

तस्मादन्यथा प्रकाशासिद्धेः यद्यमी प्रकाशन्ते, तदा स्वहेतोरेव प्रकाशस्वभावादुत्पन्नाः सन्तः *प्रकाशन्त* इति स्वीकर्तव्यम्॥

भूतार्थभावनाप्रकर्षपर्यन्तजं योगिज्ञानं चेति। योगः समाधिः, चित्तैकाग्रतालक्षणः। निश्शेषवस्तुतत्वविवेचिका प्रज्ञा। योगोऽस्यास्तीति योगी। योगिनो यत् ज्ञानं तत्प्रत्यक्षम्। *कीदृशं तदिति चेत्*, भूतार्थभावनाप्रकर्षपर्यन्तजम्। भूतार्थः प्रमाणोपपन्नार्थः। भावना पुनः पुनश्चेतसि समारोपः। भूतार्थभावनाप्रकर्षपर्यन्ताज्जातं यद्विज्ञानं तत् कल्पनापोढमभ्रान्तम्। भूतार्थश्चतुरार्यसत्यम्, दुःखसमुदयनिरोधमार्गसंज्ञकं, पञ्चस्कन्धस्वभावं क्षणि[1]कशून्य[1]निरात्मकदुःखादिरूपतया प्रतिपत्तव्यम्। यत्सत् तत् क्षणिकमित्याद्यनुमानेन प्रमाणोपपन्न[2]मुपगन्तव्यमिति॥

* missing in Gos. [1] M. काशुचि, [2] Gos. त्वं वेदितव्यं.

*ननु भावना विकल्पः, विकल्पश्चावस्तुविषयः, तत्कथं वस्तुनः स्फुटीभावो भवतु। कथं वा विकल्पो निर्विकल्पतां व्रजेत्? क्षणिकं च चित्तं कथमेकाग्रीभवति? विशेषश्च कस्य केन वा क्रियताम्? शरीरी च रागादिविरहान्मुक्तश्चेति सर्वमसंगतम्। अत्रोच्यते—अवस्तुविषयोऽपि विकल्पो वस्त्वध्यवस्यतीति भावनातो वस्तुन एवात्र स्फुटीभावः। न च विकल्प एव निर्विकल्पकः, किं तु विकल्पान्निर्विकल्पकस्योदयः। अनुभवसिद्धं चैतत् भावयतां निर्विकल्पकप्रतिभासनं, कामशोकादिवत्। न हि दृष्टे किञ्चिदनुपपन्नं नाम। क्षणिकमपि चित्तं सजातीयक्षणेषु ग्रहणप्रवीणत्वात् एकाग्रमुच्यते। क्षणिकत्वेनैव विशेषोत्पत्तिः, न तु नित्यत्वेन, नित्यस्यानाधेयातिशयत्वात्। यदुक्तम्—

'नित्यं तमाहुर्विद्वांसो यत्स्वभावो न नश्यति।
तस्य शक्तिरशक्तिर्वा या स्वभावेन संस्थिता॥
नित्यत्वादचिकित्सस्य कस्तां क्षपयितुं क्षमः'॥ इति॥

यत्तु शरीरित्वे सुखदुःखयोर्भावादनुग्रहनिग्रहात् शरीरी रागादिविरहान्मुक्तश्चेति विघटनमुक्तं, तदयुक्तम्। न हि शरीरं रागादिहेतुः, किं तु अविद्या। अनित्ये नित्यमिति, अनात्मन्यात्मेति, दुःखे सुखमिति, अशुचौ शुचितेति, चतु-

---

* Missing in Gos. 1. Not found in T

* विपर्यासस्वभावा मिथ्योपलब्धिः । अत एव विषयसुखतृष्णा स्यात् । आत्मानं नित्यं पश्यत एव सुखाभिकाङ्क्षणादिसुखहेतुरागोऽपि स्यात् । एष चाऽऽसङ्गो रागः । एतत्प्रतिबन्धाच्च द्वेषादयः । तस्मादविद्यैव मूलं रागादेर्न तु शरीरम् । सत्यपि शरीरे यद्यविद्या न स्यात्, कुत एव रागादियोगाः ? तस्माज्जीवच्छरीरे सत्यपि अविद्याविरहात् सर्वसङ्गविरहलक्षणा मुक्तिर्वीतरागाणां भवतीति सर्वं सुस्थितम् । *

तस्य विषयः स्वलक्षणम् । तस्य चतुर्विधस्य प्रत्यक्षस्य स्वलक्षणं विषयो बोद्धव्यः । स्वलक्षणमित्यसाधारणं वस्तुस्वरूपं देशकालाकारनियतम् । एतेनैतदुक्तं भवति—घटादिरुदकाद्याहरणसमर्थो देशकालाकारनियतः पुरः प्रकाशमानोऽनित्यत्वा[1]द्यनेकधर्मान्तरो[1] दासीनः प्रवृत्तिविषयसजातीयविजातीयव्यावृत्तः स्वलक्षणमित्यर्थः । * ननु यदि स्वलक्षणमेव प्रत्यक्षस्य विषयो न सामान्यं तदानीं धूमदहनसामान्ययोर्व्याप्तिः कथं प्रत्यक्षेण गृह्यताम् ? नायं दोषः । यतोऽयोगव्यवच्छेदेन स्वलक्षणं तस्य विषय एव, न त्वन्ययोगव्यवच्छेदेन स्वलक्षणमेव तस्य विषयः इति । किं तर्हि, सामान्यमप्यस्य विषयः । द्विविधो हि प्रमाणस्य विषयः ग्राह्योऽध्यवसेयश्च । तत्र प्रत्यक्षस्य प्रतिभासमानं स्वलक्षणं एको *

---

* Missing in Gos. [1] x. द्यनेकधर्मो.

† ग्राह्यः। अध्यवसेयस्तु प्रत्यक्षपृष्ठभाविनो विकल्पस्य प्रतिभासमानं सामान्यमेव। तच्च सामान्यं द्विविधं, ऊर्ध्वतालक्षणं तिर्यग्लक्षणं चेति। तत्रैकस्यामेव घटादिव्यक्तौ सजातीयव्यावृत्तायामनेकक्षणसमुदायः सामान्यं ऊर्ध्वतालक्षणं साधनप्रत्यक्षस्य विषयः। विजातीयव्यावृत्तास्त्वनेकव्यक्तयः तिर्यक्सामान्यं व्याप्तिग्राहकप्रत्यक्षस्य विषयः। अनुमानस्य तु सामान्यं ग्राह्यं, अध्यवसायस्तु स्वलक्षणमेव। प्रत्यक्षस्य स्वलक्षणविषयप्रतिपादनेन परोक्ताः षट्पदार्था न विषया इत्युक्तम् †। यथा—अवयविद्रव्यं, गुणः, कर्म, सामान्यं, विशेषः, समवायश्चेति। न चैषां प्रत्यक्षे ज्ञाने प्रतिभासोऽस्ति। न चाप्रतिभासमानो विषयो युज्यते, अतिप्रसङ्गात्। तथा हि—वस्त्रादौ परिदृश्यमाने पूर्वापरादिभागं विहाय नान्यत्किञ्चिदेकमवयविद्रव्यमुपलभामहे। यदाह न्यायपरमेश्वरः—

'भागा एव हि भासन्ते सन्निविष्टास्तथा तथा।
तद्वान्नैव पुनः कश्चिद्विभागः सम्प्रतीयते॥' इति।

एवं गुणकर्मादीनां च दूषणं प्रत्येतव्यम्॥

ननु प्रमितिरूपां क्रियां फलभूतां निष्पादयज्ज्ञानं प्रमाणमिति प्रसिद्धम्। तत्र काऽसौ प्रमितिः, यां जनयज्ज्ञानं प्रमाणमिति चेत्, उच्यते—इह नीलादेरर्थात् ज्ञानं द्विरूप-

† Missing in Gos.

[1]मुत्पद्यते, नीलाकारं, नीलबोध [2]स्वभावं[2] च । तत्रानीलाकारव्यावृत्त्या नीलाकारं ज्ञानं प्रमाणम् । अनीलबोधव्यावृत्त्या नीलबोधरूपा प्रमितिः । सैव फलम् । यथोक्तम्—'अर्थसारूप्यमस्य प्रमाणं, अर्थाधिगतिः प्रमाणफलम्' इति । एतच्च विकल्पप्रत्ययेन भिन्नं व्यवस्थाप्यते । परमार्थ [3]तस्तु नास्त्येव भेदः । यथोक्तम्—'तदेव प्रत्यक्षं ज्ञानं प्रमाणफलम्' इति । [4]साकारं चेदं ज्ञानमेष्टव्यम्[4] । यदि पुनः साकारं ज्ञानं नेष्यते, तदाऽनाकारत्वेन सर्वत्र विषये तुल्यत्वात् विभागेन विषयव्यवस्था न [6]सिध्यति[6] । यत्पुनः केचिदाहुः—पूर्वं ज्ञानं प्रमाणं उत्तरं ज्ञानं प्रमाणफलमिति, तन्न युक्तम् । तथाहि—प्रथम [6]क्षणभावि तावज्ज्ञानं[7] प्रमाणफलभूतस्य द्वितीयज्ञानस्यानुत्पत्तेः । फलभूतज्ञानोत्पत्तौ च पूर्वस्य क्षणिकत्वेन विनाशात् कथं घटादिविषयं ज्ञानं प्रमाणं [8]भवति? नापि समानकालभावि ज्ञानं फलमुचितम् । उपकार्योपकारकत्वाभावात्, सव्येतरगोविषाणयोरिव । [तस्मात् परमार्थतः प्रमाणफलयोर्नास्ति भेदः । काल्पनिकस्तु व्यावृत्तिकृतो भेदः विकल्पबुद्धौ व्यवस्थाप्यते] ॥

इति

तर्कभाषायां प्रत्यक्षपरिच्छेदः ॥

---

[1] Gos. मुपपद्यते. [2] Gos. स्वरूपं. [3] Gos. वस्तुनो. [4] Missing in T. Gos. [5] Gos. स्यादिति. [6] Gos. काल. [7] Gos. न प्रमाणं. [8] Gos. स्यात्. [] Not found in T. and Gos.

# स्वार्थानुमानम्

अनुमानं द्विविधं स्वार्थं परार्थं च । स्वस्मै यत्तत् स्वार्थमनुमानं ज्ञानात्मकम् । पर्वतादौ धर्मिणि धूमादिकं दृष्ट्वा यस्य प्रतिपत्तुः वह्निज्ञानमुत्पद्यते, स एव तेन ज्ञानेन परोक्षमर्थं प्रतिपद्यते नान्य इति स्वार्थानुमानमुच्यते । परस्मै यत्तत् परार्थम् । परार्थानुमानं वचनात्मकम् । त्रिरूपलिङ्गप्रतिपादकं वचनं परं प्रतिपादयति ज्ञापयतीति कृत्वा वचनमप्यनुमानशब्देनोच्यते, उपचारात्, यथा आयुर्घृतमिति । तत्र स्वार्थं त्रिरूप[1]लिङ्गाद्यदनु[1]मेये ज्ञानम् । रूपत्रययुक्ताल्लिङ्गादनुमेये परोक्षविषये यत् ज्ञानं प्रतिपत्तुरुत्पद्यते, तत् स्वार्थानुमानम् । तच्च धर्मविशेषसम्बन्धितया साध्याविनाभावित्वनिश्चय इत्येके । अग्न्यध्यवसाय इत्यन्ये ।

संप्रति लिङ्गस्य [2]त्रिरूपत्वमुच्यते—अनुमेये सत्त्वमेव निश्चितम् । अनुमेये पर्वतादौ धर्मिणि लिङ्गस्यास्तित्वमेव निश्चितं, तदेकं रूपं पक्षधर्मतासंज्ञकम् । अत्र सत्त्वग्रहणेनासिद्धस्य निरासः, यथा— [3]अनित्य[3]श्शब्दश्चाक्षुषत्वात्, चाक्षुषत्वं चक्षुर्विज्ञानग्राह्यत्वमुच्यते, तच्च शब्दे धर्मिणि नास्ति । एवकारेण पक्षैकदेशासिद्धस्य निरासः,

[1] Gos. लिङ्गादनु. [2] Gos. त्रैरूप्यम्. [3] Gos. नित्य.

यथा दिगम्बरप्रयोगः—चेतनास्तरवः स्वापात् । पत्रसङ्कोचलक्षणो हि स्वापः, स च सर्वेषु तरुष्वसिद्धः । निश्चितग्रहणेन सन्दिग्धासिद्धस्य [1] निरासः [1], यथा—अग्निरत्र बाष्पादित्वेन सन्दिह्यमानाद्भूतसङ्घातात् । सत्वशब्दात्पश्चादेवकारेण असाधारणस्य [1] निरासः [1], यथा—अनित्यश्शब्दः श्रावणत्वात् [2] घटवत् ॥

सपक्ष एव सत्त्वं निश्चितमिति वर्तते । समानः पक्षः सपक्षः । पक्षेण सह सदृशो दृष्टान्तधर्मीत्यर्थः । सपक्ष एव सत्त्वं निश्चितमित्यन्वयसंज्ञकं द्वितीयं रूपम् । [2] अत्र सत्त्वग्रहणेन विरुद्धस्य निरासः, यथा—शब्दो नित्यः कृतकत्वात् घटवत् । कृतकत्वं हि नित्यत्वविपक्षेणानित्यत्वेन व्याप्तमिति विरुद्धमुच्यते । एवकारेण साधारणस्य निरासः, यथा—नित्यश्शब्दः प्रमेयत्वात् घटवत् । प्रमेयत्वं हि विकल्पविषयीकृतत्वम्, तच्च सपक्षे आकाशे विपक्षे च घटादौ सर्वत्रास्तीति साधारणमुच्यते । सत्त्वशब्दात् पूर्वस्मिन्नेवकारेण सर्वसपक्षाव्यापिनोऽपि प्रयत्नानन्तरीयकस्य हेतुत्वं कथितम् । यथा—अनित्यश्शब्दः प्रयत्नानन्तरीयकत्वाद्घटवद्विद्युद्वत् । निश्चितग्रहणेन सन्दिग्धान्वयस्य निरासः, यथा—असर्वज्ञोऽयं कश्चित् वक्तृत्वादिष्टपुरुषवत् । इष्टपुरुषे सपक्षे च वक्तृत्वमसर्वज्ञत्वेन व्याप्तमव्याप्तं वा न ज्ञायते ॥

[1] Not found in T. and Gos. [2] omitted in T.
[3] Gos. तत्.

असपक्षे चासत्त्वमेव [1]निश्चितम्[1]। न सपक्षोऽसपक्षः। तत्रासत्त्वमेव [1]निश्चितं [1]व्यतिरेकसंज्ञकं तृतीयं रूपम्। अत्राप्यसत्त्वग्रहणेन विरुद्धस्य निरासः। [2]यथा नित्यश्शब्दः कृतकत्वाद्घटवत्। विरुद्धो हि विपक्षेऽस्ति[2]। एवकारेण साधारणस्य [3]विपक्षैकदेशवृत्तेर्निरासः। प्रयत्नानन्तरीयकः शब्दः अनित्यत्वाद्घटवत्। प्रयत्नानन्तरीयकत्वे साध्ये अनित्यत्वं विपक्षैकदेशे विद्युदादावस्ति। आकाशादौ नास्ति। ततो नियमेनास्य निरासः। असत्त्ववचनात्पूर्वस्मिन्नवधारणे अयमर्थः स्यात्। विपक्ष एव यो नास्ति स हेतुः। तथा च प्रयत्नानन्तरीयकत्वं सपक्षेऽपि नास्ति, ततो न हेतुः स्यात्, ततः पूर्वं न कृतमिति[3]। निश्चितग्रहणेन सन्दिग्धविपक्षव्यावृत्तिकस्य निरासः। यथाऽवीतरागोऽयं पुरुषो वक्तृत्वात्, रथ्यापुरुषवत्। यत्रावीतरागत्वं नास्ति तत्र वक्तृत्वमपि, नास्ति, यथोपलखण्डे। यदि नाम पाषाणखण्डादुभयं व्यावृत्तं तथापि न ज्ञायते किमवीतरागत्वनिवृत्त्या पाषाणखण्डाद्वक्तृत्वं निवृत्तं, आहोस्वित् स्वत एवेति। ततः सन्दिग्धव्यतिरेकोऽयमनैकान्तिकः। *असत्त्वशब्दात्पश्चा [4]देवकारेण विपक्षैकदेशवृत्तेर्निरासः। यथा–प्रयत्नानन्तरीयकश्शब्दोऽनित्यत्वात्। अनित्यत्वं विपक्षादाकाशान्निवृत्तं, न विद्युतः। ततो विपक्षैकदेशवृत्तित्वमस्य॥

[1] Not found in Gos. T. निश्चितं यत्तत् [2] [3] Missing in Gos. [4] T. omitted in T.

ननु सपक्ष एव सत्त्वमित्युक्ते सामर्थ्यादेवासपक्षे चासत्त्वमिति गम्यते। तत्किमर्थमुभयोरुपादानमिति चेत्, विपक्षनियमार्थमिति पूर्ववृद्धाः। ते च त्रिविध एव विपक्षो भवतीति मन्यन्ते। साध्याभावमात्रं, साध्यादन्यः, साध्येन सह विरुद्धश्च। प्रयोगनियमार्थमिति केचित्। [1]अन्वयप्रयोगो व्यतिरेकप्रयोगो वा नियमवानेकः प्रयोक्तव्यो न द्वावपीति। साधर्म्यवैधर्म्यप्रयोगसूचनार्थमिति केचित्।[1]

त्रिरूपाणि च त्रीण्येव लिङ्गानि। त्रीणि रूपाणि येषां तानि [2]त्रिरूपाणि [3]त्रीण्येव लिङ्गानि। कार्यं त्रिरूपं लिङ्गम्। स्वभावस्त्रिरूपं लिङ्गम्। अनुपलब्धिस्त्रिरूपं लिङ्गम्। साधनं ज्ञापकं हेतुर्व्याप्यं चेति लिङ्गापरनामानि। तत्र कार्यं यथा—यत्र धूमस्तत्राग्निर्यथा महानसे, धूमश्चात्रेति। व्याप्तिपक्षधर्मतासंज्ञकं द्व्यवयवमेव साधनवाक्यं सौगतानाम्। अन्ये तु प्रतिज्ञाहेतुदृष्टान्तोपनयनिगमनं चेति पञ्चावयवं साधनवाक्यमाहुः। उपन्यासश्चेदृशः—अग्निरत्र, धूमात्, यत्रधूमस्तत्राग्निर्यथा महानसे, तथा चायं, तस्मादग्निरिति। एतच्चायुक्तम्। प्रतिज्ञावचनमात्रात्सम्बन्धरहितात् साध्यप्रतिपत्तेरयोगात्। सम्बन्धाभावस्तु शब्दार्थयोः सम्बन्धदूषणे [3]प्रतिपादितत्वा[3]न्न पुनरुच्यते। प्रतिज्ञामन्तरेण पञ्चम्यन्तहेतुप्रयोगोऽप्ययुक्तः। हेतुं विनोपनयदृष्टान्तावप्ययुक्तौ। यत्र

---

1. 2. 3. Not found in Gos. 3, T. सिद्धत्वा.

प्रतिज्ञैव नास्ति तत्र प्रतिज्ञायाः पुनर्वचनं निगमनं कुतो भविष्यतीति सर्वमामूलं विशीर्णम्। अयं च कार्यहेतुर्विषयभेदेन त्रिविधः। अग्न्यादौ साध्ये धूमादिः त्रिविधप्रत्यक्षानुपलम्भेन निश्चेतव्यः। चक्षुरादौ साध्ये ज्ञानं कादाचित्ककार्योत्पादान्निश्चीयते। रूपादौ साध्ये रसादिरेकसामग्र्यधीनतया निश्चीयते। यथा मातुलुङ्गफले रसाद्रूपानुमानम्। [1]न रूपाद्रसानुमानम्[1]। अत्र रूपे जनयितव्ये पूर्वकं रूपमुपादानम्। रसस्तु सहकारिकारणम्। पूर्वपुञ्जादुत्तरपुञ्जस्योत्पत्तौ न्याय एषः। ननूपादानसहकारिकारणयोरन्वयव्यतिरेकानुविधानस्य कार्यं प्रति तुल्यत्वात्को भेदः? उच्यते। यद्विक्रियया यन्निष्पत्तिरेकसन्ताने तत्कार्यं प्रति पूर्वकमुपादानम्। यत्सन्तानान्तरे विशेषोदयनिमित्तं तत्सहकारिकारणम्। यथा शाल्यङ्कुरे जनयितव्ये शालिबीजमुपादानम्, क्षितिसलिलादि तत्र सहकारि। तदेवं कार्यहेतुस्तदुत्पत्तिसम्बन्धात् गमक इति स्थितम्॥

[1]स्वभावो यथा[1]—स्वभावः स्वसत्तामात्रभाविनि साध्यधर्मे यो हेतुरुच्यते स तस्य साध्यस्य धर्मस्य स्वभावो [2]बोद्धव्यः। यथा—वृक्षव्यवहारयोग्योऽयं शिंशपाव्यवहारयोग्यत्वात्। अयमिति पुरः परिदृश्यमानः पदार्थो धर्मी। शिंशपाव्यवहारयोग्यत्वादिति हेतुः। शिंशपाव्यवहारयोग्य-

---

[1] Not found in Gos, T. [2] Gos. बेदितव्यः.

त्वादिति कोऽर्थः ? शाखापत्रवर्णसंस्थानविशेषव्यवहारयोग्यत्वादित्यर्थः । वृक्षव्यवहारयोग्यत्वं साध्यम् । नन्वेकत्वे साध्यसाधनभावो न युक्तः, प्रतिज्ञार्थैकदेशत्वात् । न । अभेदेऽपि कश्चित्प्रतिपत्ता शिंशपाव्यवहारं कृत्वा तत्र वृक्षव्यवहारं प्राक् कृतमपि व्यामोहात् किञ्चिदारोप्य पुनर्न करोति । स इदानीं स्वभावहेतुना व्यवहार्यते । तस्मादेतयोः परमार्थत एकत्वेऽपि विकल्पबुद्धौ व्यावृत्तिसमाश्रयेण समुत्पन्नायां भेदेन प्रतिभासनात् साध्यसाधनत्वं न विरुध्यत इति ॥

अनुपलब्धिर्यथा—नास्तीह प्रदेशे घटः, उपलब्धिलक्षणप्राप्तस्यानुपलब्धेः । उपलब्धिलक्षणप्राप्तस्येति दृश्यस्येत्यर्थः । नन्वसतः कथं दृश्यता ? एकेन्द्रियज्ञानग्राह्ये प्रदेशादावुपलभ्यमाने यदि घटः स्यात् दृश्य एव भवेदिति । उपलम्भप्रत्ययान्तरसाकल्यात् दृश्यतया सम्भावितः, न तु दृश्य एव । तस्यानुपलब्धेरिति हेतुः । स चैकज्ञानसंसर्गिपदार्थादेकज्ञानसंसर्गिपदार्थोपलम्भाद्वा निश्चीयत इति तदुभयं कर्मकर्तृभावेन पर्युदासवृत्त्या अनुपलब्धिरुच्यते, न तु प्रसज्यवृत्त्या उपलब्धिनिवृत्तिमात्रम् । तद्धि स्वयमेव न किञ्चिदिति कथं साधनं स्यात् । नापि प्रतिषेध्यादन्यस्य ज्ञानमात्रम्, रूपोपलम्भादपि नारङ्गरसनिषेधप्रसङ्गात् । तस्मान्निषेध्यादन्यद्विशिष्टमेव वस्तुद्वयं प्रदेशः प्रदेशज्ञानं वाऽनुपलब्धिरिति स्थितम् । अत

एवाभावो न साध्यते। तस्य घटविविक्तप्रदेशग्राहिणा प्रत्यक्षेणैव सिद्धत्वात्। अभावव्यवहारस्तु मूढं प्रति अनुपलम्भेन साध्यते। तथा हि—कश्चिन्मूढो रजःप्रभृतिषु साङ्ख्यप्रसिद्धेषु गुणेष्वनुपलम्भेन प्रवर्तिताभावव्यवहारोऽपि पुनः सर्वं सर्वत्रास्तीति स्वसिद्धान्ताभ्यासात् क्वाऽपि प्रदेशादौ घटानुपलम्भे सत्यपि नाभावव्यवहारं करोतीत्यनुपलम्भेन त्रिविधो व्यवहारः कार्यते। तत्र निःशङ्कगमनागमनलक्षणः कायिको व्यवहारः। घटो नास्तीति वाचिकः। ईदृश एव अन्तर्जल्पाकारो मानसिकश्चेति। अनुपलम्भस्य कर्मधर्मपक्षे साध्येन सह [सादृश्ये] तादात्म्यलक्षण एव सम्बन्धो बोद्धव्यः। कर्तृधर्मपक्षे तु तदुत्पत्तिः। तथा हि—घटविविक्तप्रदेशः प्रदेशज्ञानं वाऽनुपलब्धिरित्युक्तम्। असद्व्यवहारयोग्यत्वं च तस्य स्वभावः [न कार्यं] ज्ञानं तु प्रदेशस्य कार्यमिति॥

ननु यद्यनुपलब्धेरपि तादात्म्यतदुत्पत्ती एव सम्बन्धौ, कथं तर्हि कार्यस्वभावाभ्यामनुपलब्धेर्भेदः? प्रतिषेधसाधनात् भेदो न वस्तुतः। यथोक्तमाचार्येण—'अत्र द्वौ वस्तुसाधनौ, एकः प्रतिषेधहेतुः' इति। उपलब्धिलक्षणप्राप्तत्वविशिष्टेन देशविप्रकृष्टे सुमेर्वादौ कालविप्रकृष्टे भविष्यच्छङ्खचक्रवर्त्यादौ स्वभावविप्रकृष्टे पिशाचादावनुपलम्भमात्र[1]सम्भवेऽपि नाभावव्यवहार इत्युक्तं भवति। इयं चानुपलब्धिर्वर्त-

[ ] Found only in M. [1] Gos. सद्भावे.

मानकाले प्रमाणं विशिष्टस्मरणसद्भावेऽतीतकाले च, अनागतकाले त्वनुपलब्धिः स्वयमेव सन्दिग्धरूपा। ततो न प्रमाणम्। [अनयाऽनुपलब्ध्याऽभावव्यवहारः साध्यते, न त्वभावः। तस्य प्रत्यक्षेणैव सिद्धत्वादित्युक्तम् प्राक्] [1]यथाऽऽह न्यायवादी—'अमूढस्मृतिसंस्कारस्यातीतस्य वर्तमानस्य च प्रतिपत्तृप्रत्यक्षस्य निवृत्तिरनुपलब्धिरभावव्यवहारसाधनी' इति। तत्र यदा दूरत्वान्निषेध्यस्यायोग्यदेशत्वं स्यात्, तदा दृश्यानुपलब्धिः साक्षात्प्रयोक्तुं न शक्यत इति कार्यानुपलब्ध्यादयः प्रयुज्यन्ते। अत एवेयं प्रयोगभेदेन षोडशधा भवति। (1) तत्र स्वभावानुपलब्धिर्यथा—नास्त्यत्र धूमः, उपलब्धिलक्षणप्राप्तस्यानुपलब्धेः। प्रतिषेध्यस्य धूमस्य यः स्वभावः तस्येहानुपलब्धिः। (2) कार्यानुपलब्धिर्यथा—नेहाप्रतिबद्धसामर्थ्यानि धूमकारणानि सन्ति, धूमाभावात्। प्रतिषेध्यानां हि धूमकारणानां कार्यं धूमः, तस्येहानुपलब्धिः। (3) कारणानुपलब्धिर्यथा–नास्त्यत्र धूमः दहनाभावात्। प्रतिषेध्यस्य धूमस्य कारणं दहनः, तस्येहानुपलब्धिः। (4) व्यापकानुपलब्धिर्यथा--नात्र शिंशपा, वृक्षाभावात्। प्रतिषेध्यायाः शिंशपायाः व्यापको वृक्षः, तस्येहानुपलब्धिः। (5) स्वभावविरुद्धोपलब्धिर्यथा–नात्र शीतस्पर्शः वह्नेरिति। प्रतिषेध्यस्य शीत-

---

[ ] Found only in M. [1] Gos. यदाह; T. न्यायवादी आह.

स्पर्शस्य यः स्वभावः तस्य विरुद्धो वह्निः तस्य चेहानुपलब्धिः। (6) कार्यविरुद्धोपलब्धिर्यथा—नेहाप्रतिबद्धसामर्थ्यानि शीतकारणानि सन्ति, वह्नेरिति। अन्त्यदशाप्राप्तमेव कारणं कार्यं जनयति, न सर्वं कारणम् ततो विशेषणोपादानम्। प्रतिषेध्यानां शीतकारणानां कार्यं शीतं, तस्य विरुद्धो वह्निः, तस्येहोपलब्धिः। (7) कारणविरुद्धोपलब्धिर्यथा—नास्य रोमहर्षादिविशेषाः सन्ति, सन्निहितदहनविशेषत्वात्। प्रतिषेध्यानां रोमहर्षादिविशेषाणां कारणं शीतं, तस्य विरुद्धो दहनविशेषः, तस्य चेहोपलब्धिः। (8) व्यापकविरुद्धोपलब्धिर्यथा—नात्र तुषारस्पर्शः, दहनात्। प्रतिषेध्यस्य तुषारस्पर्शस्य व्यापकं शीतं, तस्य विरुद्धो दहनविशेषः (9) तस्येहोपलब्धिः। स्वभावविरुद्धकार्योपलब्धिर्यथा, नात्र [1] शीतस्पर्शः, धूमात्। प्रतिषेध्यस्य शीतस्पर्शस्य यः स्वभावस्तस्य विरुद्धोऽग्निः, तस्य कार्यं धूमः, तस्य चेहोपलब्धिः। (10) कार्यविरुद्धकार्योपलब्धिर्यथा—नेहाप्रतिबद्धसामर्थ्यानि शीतकारणानि सन्ति धूमादिति। प्रतिषेध्यानां शीतकारणानां कार्यं शीतं, तस्य विरुद्धो, वह्निः, तस्य कार्यं धूमः, तस्य चेहोपलब्धिः, (11) कारणविरुद्धकार्योपलब्धिर्यथा—न रोमहर्षादिविशेषयुक्तस्पर्शवानयं प्रदेशो धूमादिति। प्रतिषेध्यानां हि रोमहर्षादिस्पर्शविशेषाणां कारणं शीतम् तस्य विरुद्धोऽग्निः, तस्य कार्यं धूमः, तस्य चेहोपल-

---

[1] Gos. तुषार.

ब्धिः । (12) व्यापकविरुद्धकार्योपलब्धिर्यथा—नात्र तुषारस्पर्शः, धूमादिति । निषेध्यस्य तुषारस्पर्शस्य व्यापकं शीतम्, तस्य विरुद्धोऽग्निः, तस्य कार्यं धूमः, तस्य चेहोपलब्धिः । (13) स्वभावविरुद्धव्याप्तोपलब्धिर्यथा—नात्र वह्निः, तुषारस्पर्शात् । प्रतिषेध्यस्य हि वह्नेर्यः स्वभावस्तस्य विरुद्धं शीतम्, तेन व्याप्तस्तुषारस्पर्शः, तस्य चेहोपलब्धिः । (14) कार्यविरुद्धव्याप्तोपलब्धिर्यथा—नेहाप्रतिबद्धसामर्थ्यानि बह्निकारणानि सन्ति, तुषारस्पर्शादिति । प्रतिषेध्यानां वह्निकारणानां कार्यं वह्निः, तस्य विरुद्धं शीतम्, तेन व्याप्तस्तुषारस्पर्शः, तस्य चेहोपलब्धिः । (15) कारणविरुद्धव्याप्तोपलब्धिर्यथा—नात्र धूमस्तुषारस्पर्शादिति । प्रतिषेध्यस्य हि धूमस्य यत्कारणमग्निः तस्य विरुद्धं शीतम्, तेन व्याप्तस्तुषारस्पर्शः, तस्य चेहोपलब्धिः । (16) व्यापकविरुद्धव्याप्तोपलब्धिर्यथा—नायं नित्यः, कदाचित्कार्यकारित्वात् । प्रतिषेध्यस्य नित्यत्वस्य निरतिशयत्वं व्यापकं, तस्य विरुद्धं सातिशयत्वं, तेन व्याप्तं कदाचित्कार्यकारित्वं, तस्य चेहोपलब्धिः । एते च कार्यानुपलब्ध्यादयः पञ्चदश प्रयोगाः स्वभावानुपलब्धिस्वभावा एव [1]प्रतिपत्तव्याः । प्रयुक्तिभेदेन परं भेदः । तत्र स्वभावानुपलम्भेनासद्व्यवहारयोग्यत्वं साध्यते, न त्वभावः । तस्य च प्रत्यक्षेणैव

---

[1] Gos. बोद्धव्याः,

सिद्धत्वात्। अपरैश्च सर्वैरभावोऽभावव्यवहारश्च साध्यते, तेषां परोक्षविषयत्वात्[1] ॥

इति तर्कभाषायां स्वार्थानुमानपरिच्छेदो द्वितीयः समाप्तः ॥

---

# परार्थानुमानम्

त्रिरूपलिङ्गाख्यानं परार्थानुमानम् । अन्वयव्यतिरेकपक्षधर्मतासंज्ञकानि त्रीणि रूपाणि येन वचनेन प्रख्याप्यन्ते तद्वचनमुपचारादनुमानशब्देनोच्यते ॥

तद्द्विविधम् साधर्म्यवद्वैधर्म्यवच्च। साध्यधर्मिदृष्टान्तधर्मिणोर्हेतुसत्ताकृतं सादृश्यं साधर्म्यम् । तद्यस्यास्ति तत् साधर्म्यवत् साधनवाक्यम् । साध्यधर्मिदृष्टान्तधर्मिणोर्हेतुसत्ताकृतं वैसादृश्यं वैधर्म्यम् । तद्यस्यास्ति तद्वैधर्म्यवत् साधनवाक्यम्। तत्र स्वभावहेतोः साधर्म्यवन्तं प्रयोगं दर्शयितुं सौत्रान्तिकमतमाश्रित्य भगवता यदुक्तं, "संस्कृतं क्षणिकं सर्वं" इति तद्व्युत्पाद्यते। समेत्य सम्भूय हेतुप्रत्ययैः कृतं वस्तुजातं संस्कृतम् । क्षणिकमिति उत्पत्तिक्षण एव सत्त्वात्। सर्वं तावत् घटादिकं वस्तु मुद्गरादिसन्निधौ नाशं गच्छत् दृश्यते । तत्र येन स्वरूपेण अन्त्यावस्थायां घटादिकं

---

[1] T. परोक्षविषयत्वात् प्रत्यक्षाविषयत्वात्.

विनश्यति तच्चेत् स्वरूपमुत्पन्नमात्रस्य विद्यते तदानीमुत्पादानन्तरमेव तेन विनष्टव्यमिति व्यक्तमस्य क्षणिकत्वम्। अथेदृश एव स्वभावस्तस्य स्वहेतोर्जातः, यत् कियन्तं कालं स्थित्वा विनश्यतीति। एवं तर्हि मुद्गरादिसन्निधाने च एष एव तस्य स्वभाव इति पुनरप्यनेन तावन्तमेव कालं स्थातव्यम्, पुनरप्येवमिति नैव विनश्येदिति। तस्मात् क्षणद्वयस्थायित्वेनाप्युत्पत्तौ प्रथमक्षणवद्द्वितीयक्षणेऽपि क्षणद्वयस्थायित्वात् पुनरपरं क्षणद्वयमवतिष्ठेत। एवं तृतीयेऽपि क्षणे तत्स्वभावत्वान्नैव विनश्येदिति। स्यादेतत्, स्थावरमेव तद्वस्तु स्वहेतोर्जातम्, बलेन विरोधकेन मुद्गरादिना विनाश्यत इति। तदसत्; कथं पुनरेत[1] द्युज्यते, न च तद्विनश्यति स्थावरत्वात्, विनाशश्च तस्य विरोधिना बलेन क्रियत इति। न ह्येतत्सम्भवति, जीवति देवदत्तो मरणं चास्य भवतीति। अथ विनश्यति, कथं तर्ह्यविनश्वरं तद्वस्तु स्वहेतोर्जातम्? न हि म्रियते चामरणधर्मा चेति युज्यते वक्तुम्। तस्मादनश्वरत्वे कदाचिदपि नाशायोगात्, दृष्टत्वाच्च नाशस्य, नश्वरमेव तद्वस्तु स्वहेतोरुप[2] जायत इत्यङ्गीकुर्मः। तस्मादुत्पन्नमात्रमेव विनश्यति। तथा च क्षणक्षयित्वं सिद्धं भवति। प्रयोगः पुन[3]रेवं कर्तव्यः—यद्यत् विनश्वरस्वरूपं तत्तदनन्तरानवस्थायि यथा अन्त्यक्षणवर्तिघटस्य स्वरूपम्। विनश्वररूपं च रूपा-

---

[1] Gos. योक्ष्यते. [2] Gos. जातमङ्गीकर्तव्यम्. [3] Gos. अयं.

दिकमुदयकाल इति स्वभावहेतुः। यदि क्षणक्षयिणो भावाः, कथं तर्हि स एवायमिति प्रत्यभिज्ञानं स्यात्? उच्यते—निरन्तरसदृशापरापरोत्पादादविद्यानुबन्धाच्च पूर्वक्षणविनाशकाल एव तत्सदृशं क्षणान्तरमुदयते। तेनाकारेण वैलक्षण्यस्याभावादभावेन चाव्यवधानात्[1] भेदेऽपि स एवायमित्यभेदाध्यवसायप्रत्ययः पृथग्जनानां प्रसूयते। अत्यन्तभिन्नेष्वपि च लूनपुन [2]र्जातकुशकेशादिष्वपि दृष्ट एव स एवायमिति प्रत्ययः। तथेहापि किं न सम्भाव्यते? तस्मात्सर्वं संस्कृतं क्षणिकमिति सिद्धमेवैतत् निर्विशेषणस्य स्वभावहेतोरयं प्रयोग इति॥

तथाऽपरोऽपि निर्विशेषणप्रयोगः—यत्सत् तत्सर्वमनित्यं, यथा घटः। सन्तश्चामी प्रमाणप्रतीताः[3]। तथाऽपरोऽपि [4]वेदस्य पौरुषेयत्व[5]साधनाय स्वभावहेतुः। यद्वाक्यं तत्पौरुषेयं, यथा रथ्यापुरुषवाक्यम्। वाक्यं चेदं "अग्निहोत्रं जुहुयात्स्वर्गकाम" इति॥

सविशेषणप्रयोगो यथा—यद्यदुत्पत्तिमत् तत्सर्वमनित्यं, यथा घटः। उत्पत्तिमांश्च शब्दः। अनुत्पन्नेभ्यो व्यावृत्तो भाव उत्पन्न उच्यते। यदा सैव व्यावृत्तिर्व्यावृत्त्यन्तरव्यवच्छेदेन व्यतिरिक्तोच्यते भावस्योत्पत्तिरिति तदा कल्पितेन भेदेन स्वभावभूतधर्मेण विशिष्टः स्वभावो हेतुः। तथा भिन्नविशेष-

---

[1] Gos. अत्यन्तोच्छेदे. [2] Gos. रुत्पन्न. [3] T. ° प्रतीताः सर्वे भावाः [4] Gos. वेदवाक्यस्य. [5] T. प्राध्यर्थं.

णस्य प्रयोगः—यत्कृतकं तदनित्यं यथा घटः, कृतकश्च शब्दः। ननु चित्रगुरिति भिन्नविशेषणस्य प्रयोगः, यथा चात्र चित्रगोशब्दे भिन्नशेषणवाचकोऽस्ति न तथा कृतकशब्दे भिन्नविशेषणवाचकं किमप्यस्ति। तत्कथं भिन्नविशेषणस्योदाहरणमिति चेदुच्यते—अपेक्षितपरव्यापारो हि स्वभावनिष्पत्तौ भावः कृतक इत्युच्यते। ततः कृतकशब्दः परव्यापारसापेक्षं स्वभावं प्रकृत्यैव वदन् भिन्नविशेषणमेवाह॥

प्रयुक्तभिन्नविशेषणस्य स्वभावस्य प्रयोगः—यः प्रत्ययभेदभेदी स कृतकः, यथा धूमः, प्रत्ययभेदभेदी च शब्दः। प्रत्ययः कारणं, तस्य भेदस्तेन भेत्तुं शीलं यस्य स प्रत्ययभेदभेदी। कारणमहत्त्वेन महत्त्वं कारणाल्पत्वेनाल्पत्वं यस्येत्यर्थः। प्रत्ययभेदभेदिशब्दस्य भिन्नविशेषणवाचकस्यात्र प्रयुक्तत्वात् प्रयुक्तभिन्नविशेषणोऽयम्। स्वभावहेतोः नानाप्रभेददर्शनं च व्यामोहनिवृत्तये धर्मभेदकल्पनयापि स्वभावहेतुरेव [1] प्रयुज्यत इति [2] प्रतिपादयितुम्।

स्वभावहेतोर्वैधर्म्यवान् प्रयोगो यथा—यद्यदाऽनन्तरानवस्थायि न भवति न तत्तदा विनश्वररूपं, यथाऽऽकाशम्। विनश्वररूपं च रूपादिकमुदयकाले। व्यतिरेकप्रयोगे साधनाभावेन साध्याभावस्य व्याप्तत्वात् साध्याभावः साध-

---

[1] Gos. प्रसज्यत. [2] Gos. प्रतिपादितम्.

नाभावे नियतो भवतीति बोद्धव्यम् । तथाऽपरोऽपि वैधर्म्यवान् प्रयोगः—यत्र क्षणिकत्वं नास्ति तत्र सत्त्वमपि नास्ति, यथा गगनारविन्दे । संश्च शब्दः । तथा यत्रानित्यत्वं निवृत्तं तत्रोत्पत्तिमत्त्वमपि, यथा कूर्मरोम्णि । उत्पत्तिमांश्च शब्दः । यत्रानित्यत्वं निवृत्तं तत्र कृतकत्वमपि, यथा शशशृङ्गे । कृतकश्च शब्दः । यत्र कृतकत्वं नास्ति तत्र प्रत्ययभेदभेदित्वमपि नास्ति, यथा गगने । प्रत्ययभेदभेदी च शब्द इति ॥

कार्यहेतोः साधर्म्यवान् प्रयोगो यथा—यत्र यत्र धूम स्तत्रतत्राग्निः, यथा महानसे, धूमश्चात्र । कार्यहेतुरपि प्रत्यक्षा-नुपलम्भाभ्यां सिद्ध एव कार्यकारणभावे सति कारणे साध्ये प्रयोक्तव्यः । वैधर्म्यप्रयोगो यथा—असत्यग्नौ न भव-त्येव धूमः यथा—महाह्रदे । अस्ति चेह धूम इति । अनुपलब्धेः साधर्म्यवान् प्रयोगोऽवयविनिराकरणाय यथा—यद्यत्रोपल-ब्धिलक्षणप्राप्तं सन्नोपलभ्यते तत्तत्रासद्व्यवहारयोग्यम्, यथा नरशिरसि शृङ्गम् । नोपलभ्यते चात्रोपलब्धिलक्षणप्राप्तः परा-भिमतोऽवयवी घटशब्दवाच्येषु कपालेषु । अनुपलब्धेर्वै-धर्म्यवान् प्रयोगो यथा—यत्सदुपलब्धिलक्षणप्राप्तं तदुपल-भ्यत एव, यथा [1] नीलादिविशेषः । नेह उपलब्धिलक्षणप्राप्तस्य सत उपलब्धिर्घटस्येति । सर्वत्र साधर्म्यवति साधन-

[1] T. द्रष्टव्यत्वेनाभिमतनीलादिबाह्यविशेषः.

वाक्ये [साध्येन] साधनं व्याप्तम् । वैधर्म्यवति [पुनः] साधनवाक्ये साधनाभावेन साध्याभावो व्याप्त इति प्रतिपत्तव्यम् । साधनस्य च साध्ये नियतत्वकथनं साध्याभावस्य साधनाभावे नियतत्वकथनं नाम व्याप्तिरभिधीयते । ततः प्रमाणेन व्याप्तिसिद्धौ सत्यां नेदं क्वापि शङ्कनीयं साधनं च स्यात्, साध्यं च तत्र धर्मिणि न [1]स्यादिति । यत्र प्रमाणेन सर्वोपसंहारवती व्याप्तिरेव न सिद्धा, तत्र शङ्काप्रसरोऽनिवार्यः । यथेश्वर [2]सिद्धौ कार्यत्वानुमाने । तथा हि तेषां साधनोपन्यासः । इहान्यः सर्वज्ञो भगवान् भवतु वा मा भूत्, ईश्वरः पुनस्सर्वज्ञः शक्यते साधयितुम् । तथा हि, लोके *त्रयः खलु* भावाः केचिन्निश्चितकर्तृकाः, यथा घटादयः । केचिन्निश्चितकर्तृनिवृत्तयः, यथा व्योमादयः । अन्ये पुनः सन्दिग्धकर्तृकाः, यथा क्षित्यादयः । न पुनरेतेभ्योऽन्यः प्रकारोऽस्ति । तत्र ये दृश्यमानोत्पत्तयो वनस्पत्यादयो ये च चिरोत्पन्ना विश्वम्भरादयः ते सर्वे सन्दिग्धकर्तृत्वेन व्यवतिष्ठमाना बुद्धिमत्कर्तृकाः कार्यत्वात्, [3]घटादिवत् । नायमसिद्धो हेतुः, कार्यत्वस्य सर्वेषां प्रमाणसिद्धत्वात् । नापि विरुद्धः, सपक्षे भावात् । न चानैकान्तः, साध्यविपर्यये बाधकप्रमाणसद्भावात् । तथा हि—कार्यं [4]तावत् बुद्धिमतः

---

[ ] Found in M. [1]Gos. भवति [2]साधने *Not found in T. and M. [3]Gos. कुम्भा [4]T. निमित्तेन.

कुम्भकारादुपजायमानं भूयोदर्शनसहायेन मानसप्रत्यक्षेणोपलब्धम्। तद्यदि बुद्धिमन्तरेणापि स्यात् तदानीं बुद्धिमतः सकाशात्कदाचिदपि नोपजायेत । [1]कारणाभावे कार्यस्य सकृदप्युत्पादायोगात् । तस्मान्नेदं क्वापि शङ्कनीयं कार्यं च स्यात् न बुद्धिमद्धेतुकमिति । अत्रेदमभिधीयते—साधनं खलु सर्वत्र साध्यसाधनयोः सर्वोपसंहारेण प्रमाणेन व्याप्तौ सिद्धायां साध्यं गमयेदिति सर्ववादिसम्मतम्। तत्र यदि दृश्यशरीरविशिष्टेन बुद्धिमता व्याप्तिर्गृह्यते तदा तथाभूतसाध्यमन्तरेणापि जायमाने तृणादौ कार्यत्वस्य दर्शनात् प्रमेयत्वादिवत् साधारणानैकान्तिकोऽयं हेतुः । तृणादयः पक्षीकृता इत्यपि न वक्तव्यम्। न हि व्यभिचारविषय एव पक्षो भवितुमर्हति 'सन्दिग्धे हेतुवचनात् [2]व्यक्तो हेतोरनाश्रय' इति न्यायात्। अथाशक्यारोहणेऽपि पर्वते दहनमन्तरेण च धूमदर्शनात् , एवं धूमेऽपि व्यभिचारो वक्तुं सुलभ एव। तन्न। अशक्यारोहणत्वेन पर्वते दहनस्य द्रष्टुमशक्यत्वात् युक्तं तत्र सन्दिग्धविषयत्वम् । प्रस्तुते तु दृश्यशरीरविशिष्टेन बुद्धिमता व्याप्तौ गृह्यमाणायां दृश्यानुपलम्भेन बुद्धिमतो बाधो भवतीति युक्तम् । अथ दृश्यशरीरेण बुद्धिमन्मात्रेण वा व्याप्तिरवगम्यते तदा अदृश्यस्य बुद्धिमन्मात्रस्य वा साध्यस्य दृश्यानुपलम्भेन व्यतिरेकासिद्धेः सन्दिग्धविपक्षव्यावृत्ति-

---

[1] Gos. अकारणात्. [3] Gos. व्यस्तो.

कोऽयं हेतुः। साध्याभावप्रयुक्तस्य साधनाभावस्या[काशादाव] सिद्धत्वेन व्याप्तेरभावात्। तथा चोक्तम् [ज्ञानश्रीमित्रपादैः]-

कार्यत्वस्य विपक्षवृत्तिहतये सम्भाव्यतेऽतीन्द्रियः
कर्ता चेद्व्यतिरेकसिद्धिविधुरा व्याप्तिः कथं सिध्यति।
दृश्योऽथ व्यतिरेकसिद्धिमनसा कर्ता समाश्रीयते
[1]तद्योगेन विना तृणादिकमिति व्यक्तं विपक्षेक्षणम्॥

यच्च त्रिलोचनेनोक्तम्—"यथा स्वाभाविकः सम्बन्धो धूमादीनां वह्न्यादिभिस्सह तथा *कार्यत्वस्य बुद्धिमता सार्धम्,* तदुपाधेरनुपलभ्यमानत्वात्, क्वचिद्व्यभिचारस्यादर्शनात्" इति। तन्न युक्तम्। यतोऽर्थान्तरं किञ्चिदपेक्षणीयमुपाधिशब्देनाभिधीयते। न चार्थान्तरमवश्यं दृश्यं स्यात्। अदृश्यमपि देशकालस्वभावविप्रकृष्टं सम्भाव्यते। अतो धूमस्य दहनेन सह सम्बन्धे भविष्यत्युपाधिः। न चोपलभ्यत इति कथमदर्शनमात्रेण नास्त्येवेत्युच्यते। यदप्युक्तं व्यभिचारस्यादर्शनादिति साधनं, तदपि सन्दिग्धासिद्धम्। प्रत्ययान्तरवैकल्येनाहत्य व्यभिचारस्यादर्शनेऽपि सर्वत्र निषेद्धुमशक्यत्वात्। न चैतावता प्रामाणिकलोकयात्रातिक्रमः। प्रामाणिकैरेव साधकबाधकप्रमाणाभावे संशयस्य विहितत्वात्।

---

[1] Gos. तत्त्यागेऽपि तदा. *Omitted in Gos.
[ ] Found in M.

नचैवं संशयेन सर्वत्राप्रवृत्तिप्रसङ्गः, प्रमाणादर्थे [1]सन्देहाच्च प्रवृत्तेरुपपत्तेः। यदप्युक्तं—"यथाऽन्यत्वाविशेषेऽपि बौद्धानां किञ्चिदेव वस्तु कार्यं स्यात्, किञ्चिदेव कारणं, न सर्वं, तथा ममाप्यन्यत्वाविशेषेऽपि किञ्चिदेव धूमादिकं वस्तु स्वाभाविकसम्बन्धेन सम्बद्धं न सर्वम्" इति। तन्न युक्तम्। यथा धूमाख्यं वस्तु दहनायत्तमिति प्रमाणसिद्धं तथा किं स्वाभाविकसम्बन्धोऽपि प्रमाणसिद्धः, येनैवमुच्यते। किञ्च स्वाभाविकसम्बन्ध इति कोऽर्थः? किं स्वतो भूतः, स्वहेतोर्वा भूतः, अहेतुको वा इति त्रयो विकल्पाः। तत्र न तावदाद्यः पक्षः, स्वात्मनि [2]क्रियाविरोधात्। नापि द्वितीयः, तदुत्पत्तिसम्बन्धस्वीकारप्रसङ्गात्। अथाहेतुकः, तदा देशकालस्वभावनियमाभावादतीवासङ्गः स्वभाविकसम्बन्धवादः। किञ्च साधर्म्येण वैधर्म्येण वा दृष्टान्तमात्रमस्तीति व्याप्तिसिद्धिः। यदृच्छया मिलितयोरपि करभगर्दभयोस्तथाभावप्रसङ्गात्। तस्मान्निदर्शनं नाम [दृष्टान्त उच्यते। स च] गृहीत[3]विस्मृतप्रतिबन्धसाधकप्रमाणस्मरणद्वारेणैव हेतावुपयुज्यते, न स्वसन्निधिमात्रेण। तथाहि—न तावदाकाशे साध्याभावेन साधनाभावः प्रतीयते। आकाशे हि यथा बुद्धिमत्कारणनिवृत्तिस्तथा अचेतनस्यापि कारणस्य निवृत्तिर्नास्त्येव। तत्कस्याभावप्रयुक्तकार्यत्वाभावः प्रतीयतां, येन साध्याभावप्रयुक्तसाधनाभावव्यति-

[1] Gos. संशया. [2] Gos. कारित्व. [ ] Found in M.
[3] T. विश्रुत.

रेकः सिध्यतीति। नापि घटे कार्यत्वस्य बुद्धिमदन्वयदर्शना-
दाकाशेऽपि *बुद्धिमदभावादेव [1]कार्यत्वाभावो वक्तुं युज्यते, यस्मादनयोस्तादात्म्यं तदुत्पत्तिरन्यो वा स्वाभाविकादिसम्बन्धः पूर्वप्रमाणेन न प्रसाधितः स्यादित्युक्तम् ॥

किञ्चादर्शनमात्रेण व्यतिरेको न सिध्यति। तथा हि, विपक्षे हेतुर्नोपलभ्यत इत्यनेन तदुपलम्भकप्रमाणनिवृत्तिरुच्यते। प्रमाणं च प्रमेयस्य कार्यम्, 'नाकारणं विषय' इति न्यायात्। न च कार्यनिवृत्तौ कारणनिवृत्ति[2]र्युज्यते, निर्धूमस्यापि वह्ने[3]र्भानात्। यदि पुनः प्रमाणसत्तया प्रमेयसत्ता व्याप्ता स्यात् तदा युक्तमेवैतत्। केवलमियमेव व्याप्तिरसम्भाविनी, सर्वस्य सर्वदर्शित्वप्रसङ्गात्। तस्मान्नादर्शनमात्रेण व्यतिरेकः सिध्यति। यथोक्तम्—

"सर्वाऽदृष्टिश्च सन्दिग्धा स्वाऽदृष्टिर्व्यभिचारिणी।
[4]भूजलान्तर्गतस्यापि बीजस्यासत्त्वदर्शनात् ॥ इति

यदपि वाचस्पतिराह—"विशेषस्मृत्यपेक्ष एव संशयो भवति ततो यथादर्शनमेव शङ्कितुमुचितम्" इति। अत्रोच्यते—नायं न्यायः सार्वत्रिकः। तथा चाभ्युपगम्यापि ब्रूमः। तथा हि—[कार्यत्वधूमत्वयोः] तादात्म्यतदुत्पत्तिसम्बन्ध[5] वियोगित्वेन

---

[1] Gos. बुद्धिम्. [2] Gos. रुपलब्धा. Gos. T. उपलब्धेः. [4] Gos. खलविला. [5] Gos. त्यागेन..

किञ्च यदि बुद्धिमन्मात्रपूर्वकत्वमनेन साध्यते, तदा सिद्धसाधनतादूषणं साधनस्य। अथ एको नित्यः सर्वज्ञ इत्यादिविशेषणविशिष्टबुद्धिमत्पूर्वकत्वं साध्यते, तदा एवं विशेषणविशिष्टेन साध्येन सह कार्यत्वस्य साधनस्य दृष्टान्तधर्मिणि प्रमाणेन व्याप्तेरसिद्धेरनैकान्तिकत्वम्। अथ सामान्येन व्याप्तिमादाय विशेषस्य पक्षधर्मताबलात् सिद्धिरुच्यते? तन्न युक्तम्। येन साध्यगतेन विशेषणेन विना हेतोर्वृत्तिर्धर्मिणि न घटते, तस्य विशेषस्य पक्षधर्मबलाद्युक्ता सिद्धिः। यथा धूमात् पर्वतदेशवृत्तित्वस्य दहनधर्मस्य, न तु तार्णत्वादीनां विशेषाणाम्। तार्णतामन्तरेणापि पर्वते धूमदर्शनात्। तद्वत् बुद्धिमतोऽपि शरीरादिवृत्तित्वं यदि सिध्यति, सिध्यतु। न पुनरत्यन्तविलक्षणं सर्वज्ञत्वम्। असर्वज्ञत्वेऽपि कार्यत्वस्य सम्भवात्। उपादानाद्यभिज्ञत्वादपि न सर्वज्ञत्वसिद्धिः। एकत्वसिद्धौ सिध्यत्येतत्। न चैकत्वं सिद्धम्। अनेककर्तृपूर्वकत्वेऽपि कार्यत्वस्य सम्भवात्। यथाऽनेककीटिकानिष्पादितः शक्रमूर्धा। अथ शक्रमूर्ध्नोऽपीश्वरपूर्वकत्वं साध्यं, तर्हि घटस्यापीश्वरपूर्वकत्वसिद्धौ कुतो दृष्टान्तत्वम्? अथ कुम्भकारस्य [1]कर्तृत्वं दृष्टं कथमपाक्रियते? कीटकादीनां च हेतुत्वं दृष्टं तदपि कथं वार्यते? नापि बहूनां कारणत्वे

---

[1] M. हेतुत्वं.

किञ्च यदि बुद्धिमन्मात्रपूर्वकत्वमनेन साध्यते, तदा सिद्धसाधनतादूषणं साधनस्य। अथ एको नित्यः सर्वज्ञ इत्यादिविशेषणविशिष्टबुद्धिमत्पूर्वकत्वं साध्यते, तदा एवं विशेषणविशिष्टेन साध्येन सह कार्यत्वस्य साधनस्य दृष्टान्तधर्मिणि प्रमाणेन व्याप्तेरसिद्धेरनैकान्तिकत्वम्। अथ सामान्येन व्याप्तिमादाय विशेषस्य पक्षधर्मताबलात् सिद्धिरुच्यते? तन्न युक्तम्। येन साध्यगतेन विशेषणेन विना हेतोर्वृत्तिर्धर्मिणि न घटते, तस्य विशेषस्य पक्षधर्मबलाद्युक्ता सिद्धिः। यथा धूमात् पर्वतदेशवृत्तित्वस्य दहनधर्मस्य, न तु तार्णत्वादीनां विशेषाणाम्। तार्णतामन्तरेणापि पर्वते धूमदर्शनात्। तद्वत् बुद्धिमतोऽपि शरीरादिवृत्तित्वं यदि सिध्यति, सिध्यतु। न पुनरत्यन्तविलक्षणं सर्वज्ञत्वम्। असर्वज्ञत्वेऽपि कार्यत्वस्य सम्भवात्। उपादानाद्यभिज्ञत्वादपि न सर्वज्ञत्वसिद्धिः। एकत्वसिद्धौ सिध्यत्येतत्। न चैकत्वं सिद्धम्। अनेककर्तृपूर्वकत्वेऽपि कार्यत्वस्य सम्भवात्। यथाऽनेककीटिकानिष्पादितः शक्रमूर्धा। अथ शक्रमूर्ध्नोऽपीश्वरपूर्वकत्वं साध्यं, तर्हि घटस्यापीश्वरपूर्वकत्वसिद्धौ कुतो दृष्टान्तत्वम्? अथ कुम्भकारस्य [1]कर्तृत्वं दृष्टं कथमपाक्रियते? कीटकादीनां च हेतुत्वं दृष्टं तदपि कथं वार्यते? नापि बहूनां कारणत्वे

---

[1] M. हेतुत्वं.

[1] विप्रतिपत्तिसम्भावना, दृष्टत्वादेवेति । [2] तस्मात् साध्यसाधनयोः सर्वोपसंहारवती व्याप्तिर्दृष्टान्तधर्मिणि प्रमाणेनावश्यं दर्शयितव्येति स्थितम् [2]। किञ्च नित्यैकसर्वज्ञे बुद्धिमति साध्ये विरुद्धोऽप्येषः। अनित्यानेकासर्वज्ञेन बुद्धिमता व्याप्तत्वात् कार्यत्वस्य । तथा हि, साध्यविपर्ययसाधनादिह विरुद्ध उच्यते। अयं च साध्यविपरीतं (*a*) साधयतीत्यास्तां तावत् प्रस्तावायातेश्वरदूषणोद्भावनानिबन्धकरणम् * ॥

ननु साधर्म्यवति साधनवाक्ये अन्वय एवोक्तः न तु व्यतिरेकः। वैधर्म्यवति च व्यतिरेक एवोक्तः न त्वन्वयः। तत्कथमाभ्यां त्रिरूपं लिङ्गं कथ्यत इति चेत्, नैष दोषः। यस्मात् साधर्म्यवति च साधनवाक्ये उपन्यस्ते सामर्थ्यादेव व्यतिरेकोऽवगम्यते । व्यतिरेकागृहीतौ च साध्याभावेऽपि न साधनाभाव इति विपर्ययः सम्भावयितव्यः। एवं चान्वयस्यैवाभावः स्यात्। सत्यपि साधने साध्याभावादिति सामर्थ्यम्। तथा वैधर्म्यवति साधनवाक्ये उपन्यस्ते सामर्थ्यादेवान्वयोऽवगम्यते, अन्वयागृहीतौ हि साधनं च स्यात् साध्यं च न भवेदिति विपर्ययः सम्भावयितव्यः। एवं च व्यतिरेक एव न भवेत्। साध्याभावेऽपि साधनस्य [3] भावादिति सामर्थ्यम्। तस्मात् द्वावपि प्रयोगौ त्रिरूपलिङ्गप्रकाशकावित्यदोषः ॥

---

[1] Gos. विमति. [2] Goe. comes after साधयतीति. marked (*a*) * Not found in Gos. [3] Gos. सत्वात्.

सम्प्रति साध्यसाधनयोर्व्याप्तिः यत्र धर्मिणि ग्रहीतव्या, येन च प्रमाणेन, तदुभयं सुखावबोधार्थं कथ्यते—स्वभावहेतोः सत्त्वलक्षणस्य क्षणिकत्वेन व्याप्तिः साध्यधर्मिण्येव ग्रहीतव्येति केचित् । तेषामन्तर्व्याप्तिपक्षोऽभिमतः । प्रसङ्गप्रसङ्गविपर्ययाभ्यां दृष्टान्तधर्मिणि घटादौ व्याप्तिर्ग्रहीतव्येत्यन्ये । तेषां बहिर्व्याप्तिपक्षोऽभिमतः । सत्त्वादन्येषां स्वभावहेतूनां कार्यहेतूनामनुपलम्भहेतूनां च दृष्टान्त एव व्याप्तिर्ग्रहीतव्या । तत्र शिंशपात्वस्य वृक्षत्वव्यवहारे साध्ये दृष्टान्ते प्रत्यक्षानुपलम्भाभ्यां व्याप्तिर्ग्राह्या । सत्वक्षणिकत्वयोस्तु प्रसङ्गप्रसङ्गविपर्ययाभ्यां प्रमाणाभ्यां, साध्यविपर्ययबाधकप्रमाणेन वा क्रमयौगपद्यनिवृत्तिलक्षणेन स्वसंवेदनसामर्थ्यसिद्धेर्विकल्पसिद्धेर्वा वस्तुत्वावस्तुत्वाभ्यां सन्दिह्यमाने विपक्षे धर्मिणि कार्यहेतोर्धूमादेर्वह्न्यादिना महानसादौ दृष्टान्तधर्मिणि त्रिविधप्रत्यक्षानुपलम्भतः पञ्चविधप्रत्यक्षानुपलम्भतो वा व्याप्तिर्ग्रहीतव्या। अनुपलम्भस्य तु असद्व्यवहारयोग्यत्वेन सह व्याप्तिः प्रत्यक्षेणैव। अन्येषां तु स्वभावहेतूनां कार्यहेतूनां वा केषाञ्चित्, [1] यथास्वभावं प्रमाणेनोन्नीय [2] ग्रहीतव्येति ॥

व्याप्त्यनिश्चये हेतोरनैकान्तिको दोषः । स च त्रिविधः—असाधारणानैकान्तिकः साधारणानैकान्तिकः सन्दिग्धविपक्ष-

[1] Gos. यथास्वं. [2] Gos. प्रतिपत्तव्येति.

ननु यद्येतत् प्रसङ्गाख्यं साधनं [1]प्रमाणं न भवति [त्रैरूप्याभावात्] कथमस्योपन्यास इति, व्याप्तिस्मरणार्थं व्याप्त्यैकदेशकथनवदिति । यदुक्तम्—'प्रसङ्गो द्वयसम्बन्धादे[2]काभावेऽन्यहानये' इति। अस्यायमर्थः—व्याप्यव्यापकयोः सम्बन्धे सति यदि व्यापकं नेष्यते तदा व्याप्यमपि नेष्यताम्। अथ व्याप्यमिष्यते तदा व्यापकमपीष्यतामिति ॥

वादिना साधन उपन्यस्ते प्रतिवादिना तत्र दूषणं वक्तव्यमिति न्यायः । असिद्धविरुद्धानैकान्तिकानामन्यतमस्योद्भावनं दूषणम् । यथोक्तम्—'दूषणानि न्यूनताद्युक्तिः' इति। NB III.138 नन्वेषामेवोद्भावनं यदि दूषणं, क्व तर्हि वैयर्थ्यासामर्थ्यातिप्रसङ्गादीनामन्तर्भावः ? अत्रैव त्रिषु । तत्र वैयर्थ्यं तावदसिद्धेऽन्तर्भवति। सन्दिग्धसाध्यधर्मो हि हेतुरुच्यते। वैयर्थ्यं तु यत्रोपन्यस्यते तत्र सन्दिग्धसाध्यधर्मकत्वं हेतोर्लक्षणं हेतौ न सम्भवतीति असिद्ध उच्यते । [हेतोर्लक्षणस्यासिद्धेः] यदुक्तम्—'सन्दिग्धे हेतुवचनात् [3]व्यक्तो हेतोरनाश्रयः' PV II 31 c इति। असामर्थ्यं तु स्वरूपासिद्धावन्तर्भवति। न हि हेतोः सामर्थ्यं नाम हेतुस्वरूपादन्यत् । हेतोरवस्तुत्वप्रसङ्गात् । अतिप्रसङ्गश्चानैकान्तिकेऽन्तर्भाव्यः, साध्य[4]धर्म[4]मतिक्रम्य विपक्षेऽपि प्रसक्तेरिति ॥

---

[1] M. प्रमाणमेव. [2] Gos. कापाये. [3] Gos. व्यस्तो.
[4] T. अर्थ.

ननु यद्येतत् प्रसङ्गाख्यं साधनं [1]प्रमाणं न भवति [त्रैरूप्याभावात्] कथमस्योपन्यास इति, व्याप्तिस्मरणार्थं व्याप्त्यैकदेशकथनवदिति । यदुक्तम्—'प्रसङ्गो द्वयसम्बन्धादे[2]काभावेऽन्यहानये' इति। अस्यायमर्थः—व्याप्यव्यापकयोः सम्बन्धे सति यदि व्यापकं नेष्यते तदा व्याप्यमपि नेष्यताम्। अथ व्याप्यमिष्यते तदा व्यापकमपीष्यतामिति ॥

वादिना साधन उपन्यस्ते प्रतिवादिना तत्र दूषणं वक्तव्यमिति न्यायः । असिद्धविरुद्धानैकान्तिकानामन्यतमस्योद्भावनं दूषणम्। यथोक्तम्—'दूषणानि न्यूनताद्युक्तिः' इति। नन्वेषामेवोद्भावनं यदि दूषणं, क्व तर्हि वैयर्थ्यासामर्थ्यातिप्रसङ्गादीनामन्तर्भावः? अत्रैव त्रिषु । तत्र वैयर्थ्यं तावदसिद्धेऽन्तर्भवति। सन्दिग्धसाध्यधर्मो हि हेतुरुच्यते। वैयर्थ्यं तु यत्रोपन्यस्यते तत्र सन्दिग्धसाध्यधर्मकत्वं हेतोर्लक्षणं हेतौ न सम्भवतीति असिद्ध उच्यते । [हेतोर्लक्षणस्यासिद्धेः] यदुक्तम्—'सन्दिग्धे हेतुवचनात् [3]व्यक्तो हेतोरनाश्रयः' इति। असामर्थ्यं तु स्वरूपासिद्धावन्तर्भवति। न हि हेतोः सामर्थ्यं नाम हेतुस्वरूपादन्यत्। हेतोरवस्तुत्वप्रसङ्गात् । अतिप्रसङ्गश्चानैकान्तिकेऽन्तर्भाव्यः, साध्य[4]धर्म[4]मतिक्रम्य विपक्षेऽपि प्रसक्तेरिति ॥

---

[1] M. प्रमाणमेव. [2] Gos. कापाये. [3] Gos. व्यस्तो. [4] T. अर्थ.

यत्र तु धर्मिणि साध्यं साधयितुमारब्धं तस्य धर्मिणः प्रमाणबाधितत्वे आश्रयासिद्धिर्हेतोर्दूषणम् । यथा सर्वगत आत्मा सर्वत्रोपलभ्यमानगुणत्वात् । तदिह बौद्धस्यात्मैव न सिद्धः, किं पुनरस्य सर्वदेशोपलभ्यमानगुणत्वं सेत्स्यति । तथा हि, तैर्थिकाः खल्वेवं [1]ब्रुवन्ति । शरीरादिवस्तुव्यतिरिक्तं शुभाशुभकर्मकर्तृतत्फलभोक्तृनित्यव्यापिरूपमात्माख्यं द्रव्यान्तरमस्ति । तेन च यदि नाम विश्वं व्याप्तं तदापि यदुपभोगायतनतया [2]परेण[2] परिगृहीतं जीवच्छरीरं तदेव सात्मकमभिधीयत इति । एतच्चायुक्तम् । आत्मनः सिद्धये प्रमाणाभावात् । न हि प्रत्यक्षेण आत्मा प्रतीयते । चक्षुरादिज्ञानानां रूपादिविषयपञ्चकनियतत्वात् । मानसस्याप्यहंप्रत्ययस्य शरीरादिविषयत्वात् गौरोऽहं स्थूलोऽहं गच्छाम्यह [3]मित्याद्याकारेण[3] अहं [4]प्रत्यय[4] उत्पद्यते । यदाह अलङ्कारकारः—

अहमित्यपि यज्ज्ञानं तच्छरीरेन्द्रि [5]यांशवित् ।
अहं काणस्सुखी गौरः समानाधारवेदनात् ॥

न चास्य शरीरव्यतिरिक्तस्य[6] तद्धर्मो गौरत्वं स्थूलत्वं वा । न च विभोरमूर्तस्य मूर्तद्रव्यानुविधायिनी गमनक्रिया युक्तिमती । न चायं माणवके सिंहप्रत्यय इव भाक्तो युक्तः, स्खलद्वृत्ति-

---

[1] Gos. वदन्ति. [2] Omited in T. [3] Gos. मित्यादिना कारणेन.
[4] M. सम्प्रत्यय. [5] M. याङ्ग. [6] Gos. धर्मो.

प्रसङ्गात्। नाप्यनुमानेन प्रतीयते, कार्यस्वभावलिङ्गाभावात्। नित्यपरोक्षेण [1] देशकालाकारव्यतिरेकविकलेनात्मना सह कस्यचिदन्वयव्यतिरेकात्मककार्यकारणभावासिद्धेः कार्यलिङ्गायोगात्। धर्मिसत्तायाश्चासिद्धत्वात् स्वभावलिङ्गानुपपत्तेः। न चान्यलिङ्गमस्ति। अन्येनापि लिङ्गेन भवता साध्यव्याप्तेन भवितव्यम्। तस्य च सर्वथाऽसिद्धेः कथं तेन व्याप्तत्वं लिङ्गस्य निश्चीयताम्? [2] किञ्च, किमयमात्मा बोधरूपः, अबोधरूपो वा? यदि बोधरूपो नित्यश्च तदा चक्षुरादिवैफल्यप्रसङ्गो दुर्वारः। अथानित्यो बोधरूपस्तदा ज्ञानस्यैवात्मेति नाम कृतम्, न विप्रतिपत्तिः। अथाबोधरूपो दृश्यश्च तदाऽनुपलम्भोऽस्य सत्तां न क्षमत इति निरात्मसिद्धिरनवद्या। तस्मात् सर्वं संस्कृतं वस्तु निरात्मकमिति॥

स्वरूपासिद्धयाऽप्यसिद्धो हेत्वाभासो भवति। यथा अनित्यश्शब्दः चाक्षुषत्वादिति। ननु व्याप्त्यसिद्धिरपि दूषणम्, तेनापि परेष्टार्थासिद्धेः। तत्किं नोच्यते? अनैकान्तिकदूषणेनैव गतार्थत्वात् पृथङ्नोक्तम्। तथा हि—न स्वलक्षणाभ्यां व्याप्तिर्ग्रहीतुं शक्या। स्वलक्षणस्य देशकालाकारनियतत्वेनाप्यन्यत्रानुगमाभावात्। अपि तु साध्यसाधनसामान्याभ्यामेव व्याप्तिर्ग्रहीतव्या। तत्र च यदि साधनं

[1] Gos. देशकालव्यतिरेक. T. देशकालाकारविकलेन.
[2] Gos. अपिच.

साध्येन व्याप्तं न प्रतीयते तदा साधनं च स्यात् साध्यं च न स्यादित्यनैकान्तिकमेव भवति ॥

[1]ननु सामान्यं चेदप्रसिद्धं[1], तत्कथं साध्यसाधनसामान्याभ्यां सर्वोपसंहारवती व्याप्तिः प्रमाणेन गृह्यते ? नैष दोषः । यतो यादृशं सामान्यं परैः परिकल्प्यते तादृशं प्रमाणेन वाध्यत इति नाभ्युपेयते तत्सौगतैः । ननु व्यवहारप्रसिद्धमन्यव्यावृत्ति[2] लक्षणमपोहसंज्ञितमपि । ननु कोऽयमपोहो नाम ? यथा[3]ध्यावसायं वाह्य एव घटादिरर्थः अपोह इत्यभिधीयते, अपोह्यतेऽस्मादन्यद्विजातीयमिति कृत्वा । यथाप्रतिभासं बुद्ध्याकारो वाऽपोहः, अपोह्यते पृथक् क्रियतेऽस्मिन् बुद्ध्याकारे विजातीयमिति कृत्वा । यथातत्त्वं निवृत्तिमात्रं प्रसज्यरूपो वाऽपोहः, अपोहनमपोह इति कृत्वा । ननु यथाध्यवसायं विधिरेव, तर्हि केवलो विषय इत्यागतम् । न [4]अपोहविशिष्टो विधिरभिप्रेतः । यच्चु गोप्रतीतौ न गवात्मा अगवात्मेति सामर्थ्यादपोहः पश्चान्निश्चीयत इति विधिवादिनां मतम् । अन्यापोहप्रतिपत्तौ च सामर्थ्यादन्यापोढो गवादिरर्थोऽवधार्यत इति[5] निवृत्त्यपोहवादिनां मतम् । तन्न युक्तम्, व्यवहारकाले प्रथमं वर्तमानस्यापि [6]प्रतीति[6] क्रमादर्शनात् ।

[1]T. ननु भवतामनैकान्तिकमेव नास्ति किं. [2]M. लक्षण शब्दाभिधेयं. [3]Gos. व्यवसायं. [4]Gos. अन्यापोह. [5]M. अभाववादि. [6]Omitted in Gos; T. प्रत्येक.

न हि विधिं प्रतिपद्य कश्चिदर्थापत्तितः पश्चादपोहमवगच्छति। अपोहं वा प्रतिपद्य पश्चा[1]दन्यापोढ[1]मवगच्छति। तस्मात् गोप्रतिपत्तिरेव अन्यापोढप्रतिपत्तिरुच्यते। यद्यपि गोशब्दादुच्चरितादन्यापोढशब्दानुल्लेख उक्तः, तथाऽपि नाप्रतिपत्तिरेव विशेषणभूतस्यान्यापोहस्य। अगवापोढ एव वस्तुनि गोशब्दस्य सङ्केतितत्वात्। यथा नीलोत्पलसङ्केतितेन्दीवरशब्दात् उत्पलप्रतीतौ तत्काल एव नीलिमस्फुरणमनिवार्यं, तथा गोशब्दादप्यगवापोढ एव वस्तुनि सङ्केतितात् गोप्रतीतौ [2]तुल्यकालमेव विशेषणत्वात् अपोहस्य अगवापोहस्फुरणमनिवार्यम्। यथा च प्रत्यक्षस्य प्रसज्यप्रतिषेधरूपाभावग्रहणमभावविकल्पोत्पादनशक्तिरेव, तथा [3]विधिविकल्पानामपि तदनुरूपानुष्ठानशक्तिरेवाभावग्रहण[4]मभिधीयते। अन्यथा यदि गोशब्दादर्थप्रतिपत्तिकाले नावगतः परापोहः, कथं तर्हि अन्यपरिहारेण प्रतिपत्ता गवि वर्तताम्। ततो गां बधानेति चोदितोऽश्वानपि बध्नीयादिति। तस्मात् स्थितमेतत्, बाह्यार्थोऽध्यवसायादेव शब्दवाच्ये व्यवस्थाप्यते; न तु स्वलक्षणपरिस्फूर्त्या; प्रत्यक्षवद्देशकालाकारावस्थानियतप्रव्यक्तस्वलक्षणास्फुरणात्। यदाह न्यायपरमेश्वरः—

---

[1] T. व्यावृत्ति. [2] M. तत्काल. [3] Gos. विकल्पानां, M. विधिकल्पानां. [4] Gos. उच्यते.

"शब्देनाव्यापृताक्षस्य बुद्धावप्रतिभासनात् । अर्थस्य दृष्टाविव" इति ॥

किञ्च स्वलक्षणात्मनि वस्तुनि वाच्ये सर्वात्मना प्रतिपत्तेः विधिनिषेधयोरयोगः । तस्य हि सद्भावे अस्तीति व्यर्थम् । नास्तीत्यसमर्थम् । *असद्भावे तु नास्तीति व्यर्थम् । अस्तीत्यसमर्थम् । *अस्ति चास्त्यादिपदप्रयोगः । तस्मात् परमार्थतो न स्वलक्षणं शब्दैरभिधीयत इति स्थितम् ॥

ननु यथा प्रत्यक्षेण घटस्वरूपे गृहीतेऽपि पश्चात्तत्रैव क्षणिकत्वादिनिश्चयार्थं प्रमाणान्तरं प्रवर्तते, तथा वृक्षशब्देन वृक्षत्वांशे प्रतिपादिते सत्त्वांशनिश्चयार्थमेव सदादिपदप्रयोगो भविष्यतीति चेत् , न । प्रत्यक्षस्यानिश्चयात्मकत्वादनभ्यस्तस्वरूपविषये प्रमाणान्तरं [1]वर्तत इति युक्तम् । विकल्पस्य तु स्वयं निश्चयात्मकत्वात्, गृहीते स्वरूपे किं [2]प्रमाणान्तरेण परं ग्रहीतव्यमिति ॥

यादृशं सामान्यं परैः परिकल्प्यते अनेकव्यक्तिसमवेतं दृश्यमेकं नित्यं तादृशस्य सत्तासाधकं न किञ्चित्प्रमाणमुपलभामहे । ततः सदिति व्यवस्थापयितुं तन्न युक्तम् । तथा हि—गवादिव्यक्त्यनुभवकाले वर्णसंस्थानाद्यात्मकं व्यक्तिस्व-

---

* Not found in Gos. [1] Gos. प्रवर्तते. [2] M. शब्दान्तरेण.

रूपमपहाय नान्यत् किञ्चिदेकमनुयायि प्रत्यक्षे भासते। तादृशस्यानुभवाभावात्। नापि स्वलक्षणानुभवानन्तरमेकाकार-परामर्शप्रत्ययात् अन्यथाऽनुपपत्त्या सामान्यपरिकल्पनं युक्ति-सङ्गतम्। व्यक्तिभ्य एव स्वहेतुदत्तशक्तिभ्योऽस्य प्रत्ययस्य परम्परयोत्पत्तेः। भेदेऽपि काश्चिदेव व्यक्तयोऽस्य जननाय समर्थाः, न सर्वाः, इत्यत्र कार्यकारणभावस्य प्रत्यक्षानुपलम्भाभ्यां दृष्टस्यानिवर्तयितुमशक्यत्वात्। दृष्टं चेदं सामर्थ्यं भेदाविशेषेऽपि कासाञ्चिदेव व्यक्तीनाम्। यथा ज्वरादिप्रशमने गुळूचीनिम्बादि-नाम्। यथोक्तम्—

*'एकप्रत्यवमर्शार्थज्ञानाद्येकार्थसाधने *।
भेदेऽपि नियताः केचित्स्वभावेनेन्द्रियादिवत्'॥

इति। किञ्च [1] सर्वगते विजातीयाद्व्यावृत्ते सत्यपि सामान्ये किं भेदाविशेषेऽपि गोव्यक्तिष्वेव समवेतं तत् सामान्यं तत्रैव चैकाकारां बुद्धिं जनयतीति प्रश्ने स्वभावेनैवेत्युत्तरं परस्य। तच्च प्रमाणासङ्गतम्। अस्माकं तु स्वभावेनोत्तरं प्रमाण [2] सिद्धत्वात् (*a*) युक्तिसङ्गतमेव॥

तथेदमपरं जातिसाधनाय साधनं परस्य। यत् विशिष्टं ज्ञानं तत् विशेषणग्रहणनान्तरीयकम्, यथा दण्डि-

---

* Missing in T. and Gos. [1] Gos. सर्वतः. [2] M. युक्तत्वात्. (*a*) Not found in Gos.

भावेऽपि प्रत्यक्षसिद्धत्वमस्याभिधातुमुचितम्। ज्ञानं हि स्वसंवेदनप्रमाणसिद्धम्, न तु चक्षुर्विज्ञानग्राह्यम्। इदं तु [सामान्यं] चक्षुर्विज्ञानग्राह्यमर्थधर्मत्वात्। प्रत्यक्षं च परैरिष्टमिति। (*a*) तदेवं परपरिकल्पितसामान्यस्य विचारासहत्वात्, अतद्रूपपरावृत्तवस्तुमात्रमेव सामान्यमुक्तम् (*a*)। तस्मात् सर्वं संस्कृतं वस्तु परपरिकल्पितसामान्येन शून्यमिति स्थितम्॥

नापि केनचिद्बुद्धिमतोपरचितमित्यपि विज्ञेयम्। तथा हि—अस्य जगतः कर्ता भवन् नित्यो वा भवेदनित्यो वा। तत्र न तावन्नित्यो युक्तः, नित्ये कर्तरि समर्थे सति सर्गस्थितिप्रलयानां नियमेन यौगपद्यप्रसङ्गात्। येन हि स्वरूपेण स्थितिप्रलययोः स कर्ता तदस्य स्वरूपं सर्गकालेऽपि सन्निहितमिति तदैव स्थितिप्रलयौ कुर्यात्। सहकारिविरहान्न करोतीति चेत्, तदसत्। न हि नित्येन सहकारिणा कदाचिदप्ययं विरहितः, सदा सन्निहितत्वात्। नाप्यनित्येन सहकारिणा विरहितः, अनित्यसहकारिणोऽपि तदायत्तजन्मत्वात्। तत एकदा सर्वकरणादिप्रसङ्गः॥

ननु बुद्धिमत्त्वादीश्वरस्य नैष दोषः। बुद्धिशून्यो हि स्वसत्तामात्रजन्यं कार्यमक्रमेणैव कुर्यात्। बुद्धिमांस्तु कर्त्तुमीशानोऽपि अनिच्छन्न करोतीति कस्तस्योपालम्भः? उच्यते—

[ ] Not found in T & Gos. (*a*) Not found in Gos.

भावेऽपि प्रत्यक्षसिद्धत्वमस्याभिधातुमुचितम्। ज्ञानं हि स्वसंवेदनप्रमाणसिद्धम्, न तु चक्षुर्विज्ञानग्राह्यम्। इदं तु [सामान्यं] चक्षुर्विज्ञानग्राह्यमर्थधर्मत्वात्। प्रत्यक्षं च परैरिष्टमिति। (*a*) तदेवं परपरिकल्पितसामान्यस्य विचारासहत्वात्, अतद्रूपपरावृत्तवस्तुमात्रमेव सामान्यमुक्तम् (*a*)। तस्मात् सर्वं संस्कृतं वस्तु परपरिकल्पितसामान्येन शून्यमिति स्थितम् ॥

नापि केनचिद्बुद्धिमतोपरचितमित्यपि विज्ञेयम्। तथा हि—अस्य जगतः कर्ता भवन् नित्यो वा भवेदनित्यो वा। तत्र न तावन्नित्यो युक्तः, नित्ये कर्तरि समर्थे सति सर्गस्थितिप्रलयानां नियमेन यौगपद्यप्रसङ्गात्। येन हि स्वरूपेण स्थितिप्रलययोः स कर्ता तदस्य स्वरूपं सर्गकालेऽपि सन्निहितमिति तदैव स्थितिप्रलयौ कुर्यात्। सहकारिविरहान्न करोतीति चेत्, तदसत्। न हि नित्येन सहकारिणा कदाचिदप्ययं विरहितः, सदा सन्निहितत्वात्। नाप्यनित्येन सहकारिणा विरहितः, अनित्यसहकारिणोऽपि तदायत्तजन्मत्वात्। तत एकदा सर्वकरणादिप्रसङ्गः ॥

ननु बुद्धिमत्त्वादीश्वरस्य नैष दोषः। बुद्धिशून्यो हि स्वसत्तामात्रजन्यं कार्यमक्रमेणैव कुर्यात्। बुद्धिमांस्तु कर्तुमीशानोऽपि अनिच्छन्न करोतीति कस्तस्योपालम्भः? उच्यते—

[ ] Not found in T & Gos. (*a*) Not found in Gos.

ता अपीच्छाः स्वसत्तामात्रनिबन्धनाः किं करोतीति स एवास्योपालम्भः। अथ स्वरूपेण सामर्थ्ये सत्यपि एष एव तस्य स्वभावः, यत्सहकारिलक्षणयाऽऽगन्तुकशक्त्या विना न करोतीति चेत्, तर्हि माताऽपि सती वन्ध्या सा प्रकृत्यैवैतदपि वक्तव्यं भवेद्भवतामिति यत्किञ्चिदेतत्॥

नन्वेष एव कार्यस्वभावः, केवलात् समर्थादपि नोदेति, सहकारिणमपेक्ष्यैव पश्चाद्भवति [नास्योपालम्भ इति] तन्न युक्तम्। समर्थो हि सहकार्यपेक्षामनादृत्य बलादेव कार्यं कुर्यात्। अन्यथा [ह्यस्य] असमर्थत्वप्रसङ्गात्। नापि नित्यः क्रमेण कार्यकारीति युक्तम्, निरपेक्षत्वात्। यदाह दिङ्मण्डलविख्यातकीर्तिर्धर्मकीर्तिः—

नित्यस्य निरपेक्षत्वात् क्रमोत्पत्तिर्न युज्यते।
क्रियायामक्रियायां च कालयोः सदृशा[1]त्मनः॥ *

इति। एतेन आत्मादीना[2]मक्षणिकानां घटादीनां क्षणिकानां च क्रमेण कार्यकरणं प्रत्युक्तम्। न चात्र प्रत्यक्षविरोधः, प्रत्यक्षेणाक्षणिकस्य ग्रहणायोगात्। न हि क्षणिकं प्रत्यक्षमक्षणिकमीक्षितुं क्षमते। अनेकक्षणव्यापारो ह्यक्षणिकः। स कथमेकक्षणभाविना[3] ध्यक्षेण ग्रहीतुं शक्यः। न हि प्रागूर्ध्वं

[ ] Not found in T & Gos. [1] M. र्थतः.
[2] T. नित्यानां. [3] T. प्रत्यक्षेण. * cf. P S V. ii. 267.

चावस्थानमधुना प्रकाशते । तस्याप्य[1] धुनातनताप्रसङ्गात् । जन्मविनाशावधिप्रतिभासप्रसङ्गादिति नेदं प्रत्यक्षं पूर्वापरकालव्याप्तमर्थं कञ्चिदपि ग्रहीतुमलम् । एतेन प्रत्यभिज्ञान[2]स्याप्रत्यक्षत्वमाख्यातम् । साक्षात्कारि हि ज्ञानं प्रत्यक्षम् । न च प्राग[3]वस्थमधुना साक्षात्कर्त्तव्यं, अपि तु स्मर्त्तव्यम् । न च स्मरणस्वरूपं प्रत्यक्षम् । अथ मतं भवेदिदं स्मरणं यदिदानीन्तनमवस्थानं न साक्षात्कुर्यात्, तत्साक्षात्करणप्रवणं कथमिदं स्मरणं नाम? यदाह भट्टः—

"पूर्व[4]प्रमितमात्रे हि जायते स इति स्मृतिः ।
स एवायमितीयं तु प्रत्यभिज्ञाऽतिरेकिणी ॥"

इति । स्मरणग्रहणस्वरूपं तर्हि प्रत्यभिज्ञानं स्यात्, न तु ग्रहणस्वरूपमेव । स्मर्यमाणे ग्रहणायोगात्, गृह्यमाणे च स्मरणायोगात् । न चैकस्य स्मरणग्रहणे सम्भवतः, परस्परविरोधात् । येन हि स्वरूपेण स्मरणं न तेन स्वरूपेण ग्रहणमित्यनुन्मत्तेन शक्यते[5]वक्तुम् । रूपान्तरेण चैकस्य स्मरणग्रहणे न स्याताम् । भावेऽपि प्रत्यक्षाप्रत्यक्षे स्याताम् । न तु स्मर्यमाणे प्रत्यक्षमेव, प्रत्यक्षायोगात् । तस्मात् प्रत्यभिज्ञाप्रत्ययो भ्रान्त एव, निर्विषयत्वात् । प्रयोगश्चैवम्—यः प्रत्यभिज्ञाप्रत्ययः स तत्त्वतो

---

[1] Gos. धुनात्व. [2] T. स्य प्रत्यक्षत्वं निरस्तम्. [3] Gos. वस्थं. [4] M. प्रतीत. [5] M. कर्त्तुं.

नैकालम्बनः, यथा लूनपुनर्जाततृणादिषु। प्रत्यभिज्ञाप्रत्ययश्चायं तदेवेदं नीलादीतिप्रत्यय इति विरुद्धव्याप्तोपलब्धिः। एकत्वानेकत्वयोः परस्परविरोधात् [1]तद्विषयकसंवेदनयोरपि विरोधः। तेनैकालम्बनत्वविरुद्धेन अनेकालम्बनत्वेन पूर्वोक्तया नीत्या प्रत्यभिज्ञाप्रत्ययो व्याप्त इति न प्रत्यभिज्ञानं क्षणिकानुमानबाधकम्। न च केशादिष्वपि सामान्यालम्बनतया एकालम्बनत्वम्। केशादिव्यक्तेरेव प्रत्यभिज्ञायमानत्वात्। सामान्ये प्रत्यभिज्ञायमाने तदेवेदं केशत्वादीति स्यात्, न तदेवेदं केशादीति। अत एवैकालम्बनत्वे प्रत्यभिज्ञाप्रत्ययस्य क्रमेतराभ्यामुत्पत्तिविरोधात् विरुद्धानैकान्तिकत्वे नाशङ्कनीये। न च प्रत्यभिज्ञानमेव तदवस्थापकम्, तस्यैव विचार्यमाणत्वात्। तस्मात् स्थितमेतत् नित्यः कर्ता नास्तीति। यदि नित्यः कर्ता जगतो न कारणं, किमस्य तर्हि कारणं? सत्वानां शुभाशुभाख्यं कर्म। यथोक्तम्:—

सत्त्वलोकमथ भाजनलोकं
 चित्तमेव रचयत्यतिचित्रम्।
कर्मजं हि जगदुक्तमशेषं
 कर्म चित्तमवधूय न चास्ति॥

इति। वैभाषिकमाश्रित्य पुनर्भगवता सर्वज्ञेन चोक्तम्—

---

[1] M. तद्विषययोरपि संवेदनयोर्विरोधात्.

'[1]आकाशं द्वौ निरोधौ च नित्यं त्रयमसंस्कृतम्[1]
संस्कृतं क्षणिकं सर्वं [2]आत्मशून्यमकर्तृकम्' ॥ इति ।

ननु सर्वज्ञसिद्धौ हि तद्वचनं निदर्शनीकर्तुमुचितम् । सर्वज्ञसिद्धये किं [3]प्रमाणमिति चेत् उच्यते । यो यः सादरनिरन्तरदीर्घकालाभ्यास [4]कलितचेतोगुणः स सर्वः [5]स्फुटीभावयोग्यः, यथा युवत्याकारः कामिनः पुरुषस्य । यथोक्ताभ्यासकलितचेतोगुणाश्चामी चतुरार्यसत्यविषयाकारा इति स्वभावहेतुः । न तावदाश्रयद्वारेण हेतुद्वारेण वासिद्धसम्भावना । सङ्कल्परूढानां चतुरार्यसत्यविषयाकाराणां धर्मिणां चेतोगुणमात्रस्य च हेतोः प्रत्यात्मवेद्यत्वात् । न चैष विरुद्धः, सपक्षे कामिन्याकारे सम्भवात् । न चानैकान्तिकः, अभ्यासेन सहितचेतोगुणस्फुटप्रतिभासयोः कारणकार्ययोः कुम्भकारघटयोरिव सर्वोपसंहारेण प्रत्यक्षानुपलम्भतः कार्यकारणभावसिद्धौ अभ्याससहितचेतोगुणत्वस्य साधनस्य स्फुटप्रतिभासकारणयोग्यतया व्याप्तिसिद्धेः । तथा हि—व्याप्त्यधिकरणे कामातुरवर्तिनि युवत्याकारे सादरनिरन्तरदीर्घकालाभ्याससहितचेतोगुणात् पूर्वमनुपलब्धिः स्फुटाभत्वस्य, पश्चादभ्याससंवेदनं, स्फुटाभसंवेदनमिति त्रिविधप्रत्यक्षानुपलम्भसाध्यः

---

[1] Found only in T. [2] M. मात्मा. [3] T. प्रमाणं नास्ति चेत्; [4] Gos. सहित. [5] स्फुटप्रतिभासयोग्यः.

कार्यकारणभावः स्फुटप्रतिभासाभ्यास [1]सहितचित्ताकारयोरित्युपपन्ना सर्वोपसंहारवती व्याप्तिः। अतोऽनैकान्तिकत्वाभावात् अनवद्यो हेतुः ॥

नन्वनेन साधनेन चतुरार्यसत्याकाराणां साक्षात्करणात् चतुरार्यसत्याकारसाक्षात्कारी विवक्षितस्सर्वज्ञः सिध्यति, न त्वविशेषेण सर्वधर्मसाक्षात्कारी, ततस्तत्सिद्धये साधनान्तरमभिधेयम्। उच्यते—यत्प्रमाणसंवादि निश्चितार्थं वचनं, तत् साक्षात् पारंपर्येण वा तदर्थसाक्षात्कारिज्ञानपूर्वकं, यथा दहनो दाहक इति वचनम्। प्रमाणसंवादिनिश्चितार्थं चेदं वचनं, क्षणिकाः सर्वसंस्कारा इति अर्थतः कार्यहेतुः। नास्यासिद्धिः, सर्वधर्मक्षणभङ्गप्रसाधनादस्य वचनस्य सत्यार्थत्वात्। नापि विरुद्धः, सपक्षे भावात्। न चानैकान्तिकता, वचनमात्रस्य संशयविपर्यासपूर्वकत्वेऽपि प्रमाण [संवदि] निश्चितार्थस्य [वचनस्य] साक्षात् पारंपर्येण वा तदर्थसाक्षात्कारिज्ञानपूर्वकत्वेन प्रत्यक्षानुपलम्भाभ्या [2]मुपलम्भात्। अन्यथा धूमादा [3]वपि हेतुत्यागप्रसङ्गादशेषकार्यहेतूच्छेदप्रसङ्गः ॥

स्यादेतत्। अनेकभवपरम्परालक्षणेन दीर्घकालेन [4]भाव्यस्य सङ्कल्पारूढस्य स्फुटाभत्वं सम्भाव्यते। भवपरम्प-

[1] T. विशिष्ट? Gos. सचिव. [ ] Not found in T & Gos. [2] M. व्याप्तेः. [3] M. वतिप्रसङ्गात्. [4] Gos. भाव्यमानस्य.

रासिद्धये तु किं प्रमाणम्? उच्यते। यच्चित्तं तत् चित्तान्तरं प्रतिसन्धत्ते, यथेदानीन्तनं चित्तम्। चित्तं च मरणकालभावीति स्वभावहेतुः। न [1]चार्हच्चरमचित्तेन व्यभिचारः। तस्यागममात्रप्रतीतत्वात् निःक्लेशचित्तान्तरजननाद्वा हेतोः क्लेशे सति विशेषापेक्षणादित्यनागतभवसिद्धिः। इह पूर्वजन्माभ्यासात् तपोदानाध्ययनादौ सर्वसत्वानामभ्यासे प्रवृत्तिरिति प्रवादः। ततस्तत्सिद्धये प्रमाणमुच्यते—यच्चितं तत् चित्तान्तरपूर्वकं यथेदानीन्तनं चित्तम्। चित्तं च जन्मसमयभावीत्यर्थतः कार्यहेतुः॥

ननु तत्त्वसाक्षात्करणान्मुक्तिः। तत्त्वं चैकमेव, यथोक्तम्—'मुक्तिस्तु शून्यतादृष्टिस्तदर्थाशेषभावना' इति। तत्कथं सर्वज्ञद्वैतं, बौद्धप्रभेदश्चेति? नैष दोषः। यस्मात्सर्वमेतत् भूतार्थे सत्त्वानवतारयितुं भगवता प्रतिपादितम्। तथा हि वैभाषिकाणां मतम्—

अकाशं द्वौ निरोधौ च नित्यं त्रयमसंस्कृतम्।
संस्कृतं क्षणिकं सर्वमात्मशून्यमकर्तृकम्॥ इति॥

सौत्रान्तिकानां मतम्—ज्ञानमेवेदं सर्वं नीलाद्याकारेण प्रतिभासते, न बाह्योऽर्थः, जडस्य प्रकाशायोगात्। यथोक्तम्—

'स्वाकारज्ञानजनका दृश्या नेन्द्रियगोचराः'

इति। अलङ्कारकारेणाप्युक्तम्—

---

[1] M. चात.

यदि संवेद्यते नीलं कथं बाह्यं तदुच्यते ।
नचेत्संवेद्यते नीलं कथं बाह्यं तदुच्यते ॥

ननु यदि प्रकाशमानं ज्ञानमेवेदं, तदाऽस्ति बाह्योऽर्थ इति कुतः? बाह्यार्थसिद्धिस्तु स्याद्व्यतिरेकतः । न हि सर्वत्र सर्वदा नीलादय आकाराः प्रकाशन्ते । न चैतत् स्वोपादानमात्र [1] बलभावित्वे सति युज्यते । नियतविषये प्रवृत्त्ययोगात् । तस्मादस्ति किञ्चिदेषां समनन्तरप्रत्ययव्यतिरिक्तं कारणं, यद्बलेन क्वचित् कदाचित् भवन्तीति शक्यमवसातुम्, स एव बाह्योऽर्थ इति, [2] न पुनरसौ बाह्योऽर्थः अवयवी, गुणादयो धर्माः द्रव्याश्रयिणः पराभिमताः, नवविधं द्रव्यं परमाणवो वेति । तत्र न तावत् गुणादयः, द्रव्यनिषेधेनैव तेषां निषेधात् । न चासति समवायिनि द्रव्ये समवाय इति तद्दूषण [3] मत्र नाद्रियते । द्रव्यं च पृथिव्यापस्तेजो वायुराकाशं कालो दिगात्मा मन इति नवविधम् । तत्रात्मनिषेधायेदमपि साधनम्—यत्कादाचित्कं ज्ञानं तत्कादाचित्ककारणपूर्वकम्, यथा सौदामिनीज्ञानम् । कादाचित्कं चेदमहंकारज्ञानमित्यर्थतः कार्यहेतुः । नायमसिद्धः, [4] अहंकारे धर्मिणि [5] ज्ञानत्वस्य प्रत्यक्षसिद्धत्वात् । नापि कादाचित्कविशेषणमसिद्धम्, सर्वदाऽहमिति ज्ञानाभावात् । नापि विरुद्धः, सपक्षे दर्शनात् । न चानैका-

---

[1] T. नियतप्रतिभास. [2] Gos, कः पुन. [3] M. मपि ज्ञायते.
[4] M. अहंकारज्ञाने.

न्तिकः, धूमपावकयोरिव कादाचित्कज्ञानकादाचित्ककारणयोः प्रत्यक्षानुपलम्भाभ्यां व्याप्तिसिद्धेः। [1]कादाचित्कज्ञानस्य चाकादाचित्ककारणादुत्पत्तौ कादाचित्ककारणादनुत्पत्तिप्रसङ्गः। अनियतहेतुकतायां चाहेतुकताप्रसङ्गः, तथाऽप्यनैकान्तिकत्वे प्रसिद्धधूमादिहेतुरप्यनैकान्तिकः स्यात्, विशेषाभावात्। अपि चाहं[2]कारस्य अकादाचित्ककारणपूर्वकत्वे सदैवोदयप्रसङ्गः। कारणस्य कुर्वद्रूपत्वात्, अकुर्वतश्चोपचारतः का णत्वात्, कुर्वदकुर्वतोरैक्याभावात्। भावे वा कुर्वतोऽप्यकुवद्रूपतापत्तिः, तत्स्वभावत्वात्। किञ्चाहंकारस्य अकादाचित्ककारणादुत्पादे युगपदेवोत्पादप्रसङ्गः, अव्यग्रसामग्रीकत्वात्। नन्वहंकारस्यालम्बनमात्मा न कारणमिति चेन्न। अकारणस्यालम्बनत्वायोगादतिप्रस ादिति॥

अथ किमाकाशं नाम किञ्चिद्वस्तुभूतमस्ति? त नास्ति वा? नास्त्येवैतत्। यत्र हि सप्रतिघं द्रव्यमस्ति न तत्राकाशमवकाशं वा ददाति। यत्र नास्ति तत्र तदभावादेवावकाशः सिद्ध इति क्व वाऽऽकाशमवकाशं दद्यात्? [यस्मादवकाशप्रदमाकाशं भण्यते] तस्मात् सत्यस्मिन् सर्वदा [3]सर्वथा सर्वत्रावकाशः स्यात्। न चैतदस्ति। तस्मान्नास्त्येवाकाशमिति प्रतीमः। एतच्च वैभाषिकमतमपेक्ष्य दूषणमुक्तम्॥

[1] M. कदाचित् ज्ञानत्वस्य. [2] कारज्ञानस्य. [3] Not found in T. [ ] Found only in M.

परैस्त्वाकाशं शब्दगुणकमिष्यते। तच्चैकमिति चेत् समानदेशत्वात् सर्वशब्दानां विभागेन श्रवणं न स्यात्। ततस्सन्निहितदेश इव दूरदेशाभिमतोऽपि शब्दः श्रूयेत। न वान्योऽपीत्येकान्तः। दिक्कालयोश्चैकत्वात् पूर्वापरादिप्रत्ययानुपपत्तिः। एतेन नित्यस्यापि मनसोऽसम्भव एव। तथा हि—युगपज्ज्ञानानुत्पत्त्या मनोऽनुमीयते तद्वादिभिः। अनुभूयन्त एव युगपद्बहूनि ज्ञानानि नर्त्तकीदर्शनादौ। यदि पुनर्मनो [नित्यं] स्यात्तदानीमेतानि ज्ञानानि न युज्यन्ते। तस्मान्नास्त्येव मनोऽपि॥

पृथिव्यादयोऽवशिष्यन्ते। ते चावयविपरमाणुभेदेन द्विधा इष्यन्ते। तत्र योऽवयवी घटादिः परमाणुभिर्द्व्यणुकादिक्रमेणारब्धः प्रसिद्धः तस्य उपलब्धिलक्षणप्राप्तस्यानुपलम्भो बाधक इत्युक्तम्। यद्यवयवी नास्ति कथं तर्ह्ययमेकत्वेन प्रतिभासत इति चेत्—

भागा एव हि भासन्ते सन्निविष्टास्तथा तथा।
तद्वान्नैव पुनः कश्चिन्निर्भागः सम्प्रतीयते॥

इत्युक्तम्। ननु कोऽयं भागप्रतिभासो नाम? नानादिग्देशावष्टम्भेन सञ्चितः परमाणुप्रतिभास एव। यद्येवं कथं 'प्रतिभासधर्मः स्थौल्यम्' इत्युक्तं धर्मोत्तरेण; तत्राप्ययमेवार्थः। अर्थस्य स्वरूपेण नास्ति वेदनम्; "भाक्तं स्यादर्थवेदनम्"

इति वचनात् । तस्माद्योऽयं नीलादिप्रतिभासो नानादेशव्यापित्वेनानुभूयते स एव स्थूलप्रतिभास इत्यदोषः। येऽपि तदारम्भकाः परमाणवो वैशेषिकाणां, साक्षादध्यक्षगोचरा वैभाषिकाणां दर्शने, स्वाकारसमर्पणप्रवणाः सौत्रान्तिकानां मते, तेऽपि योगाचाराणां दर्शने न सम्भवन्ति। न खल्वेकः [1]परमाणुः प्रसिद्धिमध्यास्ते। तस्याधरोत्तरचतुर्दिक्षु परमाणुमध्यासीनस्य नियमेन षडंशतापत्तेः। यो ह्यस्य स्वभावः पूर्वपरमाणुप्रत्यासन्नः न स एवापरपरमाणुप्रत्यासन्नो घटते। तयोरेकदेशताप्राप्तेः । एवं च स पूर्वपरमाणुसन्निहितस्वभावोऽपरपरमाणुं प्रत्यासीदेद्यदि सोऽपि तत्र स्यात्। असत्यामपि प्रत्यासत्तावाभिमुख्यमात्रेऽप्ययमेव वृत्तान्तः। ततश्च परमाणुमात्रं पिण्डः प्रसक्तः॥

अथवाऽयं विचारः; यदेतत्प्रतिभासमानं तदेकं तावन्न युक्तम्, अनन्तरोक्तविचारात् । नाप्यनेकं, [1]परमाणुशः परमाणो[2]रयोगात् । तथाहि—यद्यसौ सांशः कथं परमाणुः? अथ निरंशः तदा संयुक्ताः परमाणवः सर्वात्मना संयोगात् परस्परमभिन्नदेशाः स्युरिति सर्वः पिण्डः परमाणुमात्रं स्यात्, पर्वतोऽपि क्षितिरपीति। तस्मादवश्यं तयोः स्वभावयोर्भेदोऽभ्युपेतव्यः। यथा चानयोस्तथाऽधरोत्तरदक्षिणोत्तरपरमाणु-

---

[1]T. मध्यस्थः + [2]T. परमाण्वंशस्य परमाणावनुपलब्धेः।

नास्ति स्वप्नज्ञानादविशिष्टं विवादा[1]स्पदीभूतं जाग्रद्विज्ञान-मिति स्वभावहेतुः। यदि बाह्योऽर्थो नास्ति किं तर्हि परमार्थसत्? ग्राह्यग्राहकादिकलङ्कानङ्कितं निष्प्रपञ्चविज्ञानमात्रं परमार्थसत्। यथोक्तम्—"ग्राह्यग्राहकनिर्मुक्तं विज्ञानं परमार्थसत्" इति। पुनश्चोक्तम्—

"नान्योऽनुभाव्यो बुद्ध्याऽस्ति तस्या नानुभवोऽपरः।
ग्राह्यग्राहकवैधुर्यात् स्वयं सैव प्रकाशते॥"

उक्तं चैतद्भगवता—

"बाह्यो न विद्यते ह्यर्थो यथा बालैर्विकल्प्यते।
वासनालुठितं चित्तमर्थाभासं प्रवर्त्तते॥" इति।

तत्र केचिदेवमाहुः— विज्ञानमेवेदं सर्वं सर्वशरीर-विषयभावेन प्रसिद्धम्। तच्च स्वसंवेदनमिति न कस्यचित् ग्राह्यं ग्राहकं वा। कल्पनया तु ग्राह्यग्राहकभाव इति व्यव-स्थाप्यते। ततः परिकल्पितग्राह्यग्राहकभावरहितं विज्ञानं [साकार] सत्यमिति। अन्ये तु सकलाकारकलङ्कानङ्कितं शुद्धस्फटिकसंकाशं वास्तवं विज्ञानम्। आकारास्त्वमी वितथा एवाविद्यया दर्शिताः प्रकाशन्ते। तस्मात् ग्राह्यं नाम नास्त्येव। [2]ग्राह्याभावात्[2] तदपेक्षया यद्ग्राहकत्वं विज्ञानस्य तदपि नास्तीति। माध्यमिकानां तु दर्शने तदपि विज्ञानं न परमा-

---

[1] Gos. ध्यासितं. [ ] Not found in T. & Gos.
[2] T. सर्वत्र तदभावात्.

नाऽत्र स्वप्नज्ञानादविशिष्टं विवादा[1]स्पदीभूतं जाग्रद्विज्ञान-मिति स्वभावहेतुः। यदि बाह्योऽर्थो नास्ति किं तर्हि परमार्थसत्? ग्राह्यग्राहकादिकलङ्कानङ्कितं निष्प्रपञ्चविज्ञानमात्रं परमार्थसत्। यथोक्तम्—"ग्राह्यग्राहकनिर्मुक्तं विज्ञानं परमार्थसत्" इति। पुनश्चोक्तम्—

"नान्योऽनुभाव्यो बुद्ध्याऽस्ति तस्या नानुभवोऽपरः।
ग्राह्यग्राहकवैधुर्यात् स्वयं सैव प्रकाशते॥"

उक्तं चैतद्भगवता—

"बाह्यो न विद्यते ह्यर्थो यथा बालैर्विकल्प्यते।
वासनालुठितं चित्तमर्थाभासं प्रवर्त्तते॥" इति।

तत्र केचिदेवमाहुः— विज्ञानमेवेदं सर्वं सर्वशरीर-विषयभावेन प्रसिद्धम्। तच्च स्वसंवेदनमिति न कस्यचित् ग्राह्यं ग्राहकं वा। कल्पनया तु ग्राह्यग्राहकभाव इति व्यव-स्थाप्यते। ततः परिकल्पितग्राह्यग्राहकभावरहितं विज्ञानं [साकार] सत्यमिति। अन्ये तु सकलाकारकलङ्कानङ्कितं शुद्धस्फटिकसंकाशं वास्तवं विज्ञानम्। आकारास्त्वमी वितथा एवाविद्यया दर्शिताः प्रकाशन्ते। तस्मात् ग्राह्यं नाम नास्त्येव। [2]ग्राह्याभावात्[2] तदपेक्षया यद्ग्राहकत्वं विज्ञानस्य तदपि नास्तीति। माध्यमिकानां तु दर्शने तदपि विज्ञानं न परमा-

---

[1] Gos. ध्यासितं. [ ] Not found in T. & Gos.
[2] T. सर्वत्र तदभावात्.

र्थसत्, विचारासहत्वात्। स्वभावेन हि युक्तं पारमार्थिकमुच्यते लोके। न चास्य विचारतः कश्चित्स्वभावो घटते एको वाऽनेको वा, पूर्वविचारासहत्वात्। यथोक्तम्—

"नेष्टं तदपि धीराणां विज्ञानं पारमार्थिकम्।
एकानेकस्वभावेन वियोगाद्गगनाब्जवत्॥"

इति॥ कीर्तिपादैरप्युक्तम्—

"भावा येन निरूप्यन्ते तद्रूपं नास्ति तत्त्वतः।
यस्मादेकमनेकं वा रूपं तेषु न विद्यते॥"

इति॥ तथाऽलङ्कारकारेणाप्युक्तम्—

"यदा तु न विकल्पस्य न चान्यस्य प्रमाणता।
तदा विशीर्यमाणेऽपि सर्वस्मिन् कोऽपराध्यतु॥"

"बद्धमुक्तादिभेदोऽपि न चास्ति परमार्थतः।
भेदो हि नावभात्येव सर्वत्र समदर्शिनाम्॥"

इति॥ प्रयोगः पुनरेवम्—यदेकानेकस्वभावं न भवति न तत्परमार्थसत्, यथा व्योमकमलम्, एकानेकस्वभावं च न भवति विज्ञानमिति व्यापकानुपलब्धिः। न तावदयमसिद्धो हेतुः। साकारे ज्ञाने बहिरर्थ इव एकानेकस्वभावायोग्यत्वस्य परिस्फुटत्वात्। यत्र हि लोकस्य बाह्यार्थव्यवहारस्तदेव साकारवादिनो ज्ञानम्। ततो यत्तस्य बहिर्भावे बाधकं तदे-

वान्तर्भावेऽपि बाधकम्। न हि स्थूलमेकमनेकं च परमाणुरूप[1]मपीष्यते। विज्ञानात्मकानामयमाकारो यद्येकः स्थूलो यदि वाऽनेकः परमाणुशो भिन्नः उभयथाऽपि बाह्यार्थपक्षभाविदूषणमशक्यमुद्धर्तुम्। न हि तद्विज्ञाने बहिर्भावनिबन्धनं दूषणम्! येन तद्भावेन भवेत्। मूर्तिनिमित्तं बाधकम्; नामूर्ते विज्ञानात्मनि इत्यपि निस्सारम्। साकारतायां विज्ञानस्यापि मूर्तत्वात्। अयमेव हि [2]देशवितानवा(नाकारो) मूर्तिरिति॥

[3]श्रीमन्महाजगद्दलविहारीय महापण्डितभिक्षुमोक्षाकरगुप्तविरचितायां तर्कभाषायां परार्थानुमानपरिच्छेदः समाप्तः॥

तर्कभाषामिमां कृत्वा पुण्य[4]मासादि यन्मया।
तेन पुण्येन लोकोऽयं बुद्धत्वमधिगच्छतु॥

॥ तर्कभाषा समाप्ता॥

---

[1] T. मुपपद्यते. [2] M. देशे वितानवानारानो. Gos. देशचित्तानामाकारो.

[3] M. पण्डितस्थविरमोक्षाकरगुप्तविरचितायां सप्तशतिकायां.
तर्कभाषायां परार्थानुमानपरिच्छेदः समाप्तः॥

Gos. श्रीमद्राजजगद्दलविहारीय महायतिभिक्षु . . . . . . . . . . . समाप्तः॥

[4] M. समासादितम्.

# वादस्थानानि

बुद्धानामनुरोधेन यथामतिश्रुतिस्मृति ।
ह्रियं विहाय लिख्यन्ते वादस्थानानि कानिचित् ॥

तत्र तावद्वादो जातिवाद एव निराक्रियते ;—इह यद्वस्तुनो भेदाभेदाभ्यामभिधेयं न भवति तत्सर्वं वस्तु न भवति यथा व्योमकमलम् । न च भेदाभेदाभ्यामभिधेयं सामान्यमिति[1] व्यापकानुपलब्धिः । न तावदय[2] मसिद्धो हेतुः । न हि व्यक्तिभ्यो भिन्नमभिन्नं वा सामान्यं शक्यमभिधातुम् । उभयथाऽप्यसामान्यस्वभावताप्रसङ्गात् । तथा हि ;—यदि तावद्व्यक्तिभ्योऽर्थान्तरमेव सामान्यमभिमतं वस्तु ; तदा न तत् तासां सामान्यं नाम । यत्खलु यतोऽर्थान्तरं न तत् तस्य सामान्यम्, यथा गोरश्वः । अर्थान्तरं च गोत्वमिति विरुद्धव्याप्तोपलब्धिः ॥

ननु च व्यक्तिभ्योऽर्थान्तरं च स्यात् सामान्यं च तासामिति न विरोधं पश्यामः । न चैतन्मन्तव्यमर्थान्तरं

---

[1] प्रतिषिद्धस्य वस्तुत्वस्य व्यापकमभिधेयत्वं तस्यानुपलब्धिः.

[2] भेदाभेदाभ्यामनभिधेयत्वमिति हेतुः.

चे [1]दर्थान्तरस्य सामान्यम्, सर्वं सर्वस्य सामान्यं स्यात् विशेषाभावादिति। यद्धि खल्वेकं वस्त्वनेकत्र समवेतं तत्तदीयं सामान्यम्। गोषु चाश्वो न समवेत इति कथमसौ गवां(श्च) ? सामान्यं स्यादिति कुतो विशेषाभावः? तदयमनैकान्तिको [2]हेतुः कथमिष्टसिद्धये [3]पर्याप्नुयादिति चेत्; तदेतदपि बालप्रलापमनुसरति;—स हि विशेषो बुद्धिमता वक्तव्यो यस्सामान्यपदार्थमात्रभावी सन्नसङ्करेण व्यवस्थामुपपादयेत्, अयं चानेकसमवायः सङ्ख्यासंयोगादीनामवयविकार्यद्रव्यादिष्वप्यस्तीति तान्यपि सङ्ख्यादिमतां सामान्यानि स्युः॥ अथ मन्येथाः;—सत्यप्यनेकार्थसमवाये यदेव समानज्ञानाभिधानप्रवृत्तिनिमित्तं तदेव सामान्यं नान्यदिति। समानानां भावः सामान्यं [4]भवतोऽस्मादभिधानप्रत्ययाविति भावः॥ यदाह अक्षपादः[5];—"समानज्ञानाभिधानप्रसवात्मिका जातिः" इति। एतदपि स्वप्रक्रियामात्रपरिदीपनम्[6]। तथा हि—अत्र

---

[1] व्यक्तिरूपस्य. [2] हेतुः सामान्येऽपि सद्भावादनैकान्तिकः. [3] अर्थान्तरत्वादिसमर्थो भवेत्. [4] प्रथमपुरुषद्विवचनान्तप्रयोगोऽयम्. [5] 'योऽर्थोऽनेकत्रप्रत्ययानुवृत्तिनिमित्तं तत्सामान्यम्' इति वात्स्यायनभाष्यं तद्वार्तिकं तट्टीकां च पर्यालोच्य नैयायिकाभिप्रायपूरणेनानुवदति;—समानज्ञानाभिधानप्रसवात्मिका जातिः। इति Cf. Nyāyasūtra, II, 2-70 समानप्रसवात्मिका जातिः. [6] प्रकाशनम्.

मेव तर्हि तन्नित्यसामान्यजन्यमभ्युपेतं स्यात्। तथा च भेदानां असमानानां कथं सामान्यमिति पर्यनुयोगितेनापि तद्व्यतिरिक्त-सामान्यरूपकरणोपगमे सत्यपरापरकार्यसामान्यपरिकल्पनात्मकमनवस्थानमप्रतिविधानमासज्येत। नचाभेदानामसमानं रूपं प्रत्यवेत। नापि[1] द्वितीयपक्षाश्रयणं श्रेयः। न ह्यन्येन अन्ये समाना नाम प्रतीयन्ते। तद्वदन्ये नाम प्रतीयेरन्। भूतवत्। कथं? गुणेन; अन्यथा हि येन केनचिदन्येन ये केचन समानाः प्रतीयेरन्, *प्रतिनियतां बन्धनाभावात् एकेनानेकसमवायिनार्थेन अन्ये समानाः प्रतीयन्ते ततो नातिप्रसङ्ग इति चेत्, वार्तमेतत्। न खल्ववयविद्रव्यद्वित्वादिसङ्ख्यानामपि एकत्वानेकसमवायिद्वित्वे न स्तः। येन तेभ्योऽवयवादयो न तथावगम्येरन्। अथ तेषां स्वाश्रयेषु समानज्ञानाभिधानसामर्थ्याभावाददोष एषः। ननु सामान्यमपि भेदेष्वेकत्वानेकसमवायाभ्यामेव समानप्रत्ययहेतुतया परिकल्पितम्। अथ ते च अवयव्यादीनामपि युष्माभिरभ्युपेताविति तेषामपि तथाभावः कथमपाक्रियेत? असामान्यस्वभावत्वात् न तेऽनुमानहेतव इति चेत्। ननु समानज्ञानहेतुत्वे सति सामान्यस्वभावता; तस्यां च सत्यां समानज्ञानहेतुत्वमिति स्फुटमितरेतराश्रयित्वम्। तथा हि;—एकत्वादेः सामान्यत्वात् निमित्तस्य सामान्याभिमतभाववदारब्धद्रव्यादेरपि किं न सामान्यरूपतेति

[1] व्यवसीयन्त इति पक्षाश्रयणम्. * प्रतीयन्ताम् इति स्यात्.

मेव तर्हि तन्नित्यसामान्यजन्यमभ्युपेतं स्यात्। तथा च भेदानां असमानानां कथं सामान्यमिति पर्यनुयोगितेनापि तद्व्यतिरिक्त-सामान्यरूपकरणोपगमे सत्यपरापरकार्यसामान्यपरिकल्पनात्मकमनवस्थानमप्रतिविधानमासज्येत। नचाभेदानामसमानं रूपं प्रच्यवेत। नापि[1] द्वितीयपक्षाश्रयणं श्रेयः। न ह्यन्येन अन्ये समाना नाम प्रतीयन्ते। तद्वदन्ये नाम प्रतीयेरन्। भूतवत्। कथं? गुणेन; अन्यथा हि येन केनचिदन्येन ये केचन समानाः प्रतीयेरन्, *प्रतिनियतां बन्धनाभावात् एकेनानेकसमवायिनार्थेन अन्ये समानाः प्रतीयन्ते ततो नातिप्रसङ्ग इति चेत्, वार्तमेतत्। न खल्ववयविद्रव्यद्वित्वादिसङ्ख्यानामपि एकत्वानेकसमवायिद्वित्वे न स्तः। येन तेभ्योऽवयवादयो न तथावगम्येरन्। अथ तेषां स्वाश्रयेषु समानज्ञानाभिधानसामर्थ्याभावाद्दोष एषः। ननु सामान्यमपि भेदेष्वेकत्वानेकसमवायाभ्यामेव समानप्रत्ययहेतुतया परिकल्पितम्। अथ ते च अवयव्यादीनामपि युष्माभिरभ्युपेताविति तेषामपि तथाभावः कथमपाक्रियेत? असामान्यस्वभावत्वात् न तेऽनुमानहेतव इति चेत्। ननु समानज्ञानहेतुत्वे सति सामान्यस्वभावता; तस्यां च सत्यां समानज्ञानहेतुत्वमिति स्फुटमितरेतराश्रयित्वम्। तथा हि;—एकत्वादेः सामान्यत्वात् निमित्तस्य सामान्याभिमतभाववदारब्धद्रव्यादेरपि किं न सामान्यरूपतेति

[1] व्यवसीयन्त इति पक्षाश्रयणम्. * प्रतीयन्ताम् इति स्यात्.

किञ्चित् क्षीयते; न वयं नाम्नि विवदामहे। द्वितीयोऽपि पक्षो महतीं मनोराज्यसम्पदमावेदयति। तथा हि;—अत्रापि विकल्पद्वयमुदयते, किं व्यक्तिभ्यः सामान्यस्याभेदः? उत व्यक्तीनां सामान्यात्? इति। आद्यपक्षे व्यक्तिवदनेकत्वमसत्त्वं च सामान्यस्य स्यात्। प्रयोगः—व्यक्तिभ्यो यदभिन्नं तदनेकमनित्यं च, यथा तासां प्रातिस्विकं रूपम्। व्यक्तिभ्यस्त्वभिन्नं सामान्यमिति स्वभावहेतुः प्रसङ्गः। नानैकान्तिको हेतुः, एकत्वनित्यत्वयोः सामान्यस्य विरुद्धधर्माध्यासेन व्यक्तिभ्यः सुखादिभ्य इव अन्यस्य एकान्तेन भेदभङ्गात्। अपरस्मिन् पुनर्विकल्पे सामान्यवद्व्यक्तीनमप्येकत्वनित्यत्वे स्याताम्। प्रयोगः:—यत्सामान्यादभिन्नं न तद्भिन्नमनित्यं च; यथा तस्यैव सामान्यता; सामान्यादभिन्नं च व्यक्तीनां रूपमिति व्यापकविरुद्धोपलब्धिः प्रसङ्गः। न चानैकान्तिकः, सामान्यादभिन्नं हि सामान्यमेव। तच्चैकं नित्यं चेत्, कथं तदभिन्नं भिन्नमनित्यं च नाम? एवं ब्रुवाणः सामान्यमेवानेकमनित्यं च ब्रूयात्। तस्य च साक्षादभिन्नत्वनित्यत्वे प्रतिज्ञाय पुनरयं देशान्तरत एव प्रतिभातीति कथं नोन्मत्तः। तस्माद्भेदाभेदाभ्यामवाच्यं सामान्यमिति सिद्धम्॥

न चायमनैकान्तिको हेतुः। यद्यपि हि सामान्यं भेदाभेदा व्यक्तय एव आभ्यां केवलाभ्यामवाच्यम्, तथापि प्रकारान्तरस्याप्युभयात्मतालक्षणस्य सम्भवात् भिन्नाभिन्नमेव हि सामान्यं चैवमिति जैनाः प्रतिजानते। यदाहुः—

für Tibetologie und Buddhis

किञ्चित् क्षीयते; न वयं नाम्नि विवदामहे। द्वितीयोऽपि पक्षो महतीं मनोराज्यसम्पदमावेदयति। तथा हि;—अत्रापि विकल्पद्वयमुदयते, किं व्यक्तिभ्यः सामान्यस्याभेदः? उत व्यक्तीनां सामान्यात्? इति। आद्यपक्षे व्यक्तिवदनेकत्वमसत्त्वं च सामान्यस्य स्यात्। प्रयोगः—व्यक्तिभ्यो यदभिन्नं तदनेकमनित्यं च, यथा तासां प्रातिस्विकं रूपम्। व्यक्तिभ्यस्त्वभिन्नं सामान्यमिति स्वभावहेतुः प्रसङ्गः। नानैकान्तिको हेतुः, एकत्वनित्यत्वयोः सामान्यस्य विरुद्धधर्माध्यासेन व्यक्तिभ्यः सुखादिभ्य इव अन्यस्य एकान्तेन भेदभङ्गात्। अपरस्मिन् पुनर्विकल्पे सामान्यवद्व्यक्तीनमप्येकत्वनित्यत्वे स्याताम्। प्रयोगः:—यत्सामान्यादभिन्नं न तद्भिन्नमनित्यं च; यथा तस्यैव सामान्यता; सामान्यादभिन्नं च व्यक्तीनां रूपमिति व्यापकविरुद्धोपलब्धिः प्रसङ्गः। न चानैकान्तिकः, सामान्यादभिन्नं हि सामान्यमेव। तच्चैकं नित्यं चेत्, कथं तदभिन्नं भिन्नमनित्यं च नाम? एवं ब्रुवाणः सामान्यमेवानेकमनित्यं च ब्रूयात्। तस्य च साक्षादभिन्नत्वनित्यत्वे प्रतिज्ञाय पुनरयं देशान्तरत एव प्रतिभातीति कथं नोन्मत्तः। तस्माद्भेदाभेदाभ्यामवाच्यं सामान्यमिति सिद्धम्॥

न चायमनैकान्तिको हेतुः। यद्यपि हि सामान्यं भेदाभेदा व्यक्तय एव आभ्यां केवलाभ्यामवाच्यम्, तथापि प्रकारान्तरस्याप्युभयात्मतालक्षणस्य सम्भवात् भिन्नाभिन्नमेव हि सामान्यं चैवमिति जैनाः प्रतिजानते। यदाहुः—

...ür Tibetologie und Bu...

[1] घटमौलिसुवर्णानां नाशोत्पादस्थितिष्वयम् ।
शोकप्रमोदमाध्यस्थ्यं जनो याति सहेतुकम् ॥

न सामान्यात्मनोदेति न व्येति व्यक्तमन्वयात् ।
व्येत्युदेति विशेषेण सहैकत्रोदयादि सत् ॥

[2] यथा [3] कल्माषवर्णस्य यथेष्टं [4] वर्णनिग्रहः ।
चित्रत्वाद्वस्तुनोऽप्येवं भेदाभेदावधारणा ॥

यदा तु शबलं वस्तु युगपत् प्रतिपद्यते ।
तदान्यानन्यभेदेन सर्वमेव प्रतीयते ॥

एकात्मकं भवेदेतदिति नेश्वरभाषितम् ।
तत्तथैव प्रपत्तव्यं यद्यथैवोपलभ्यते ॥

इति । अत्र प्रतिविधीयते; भेदाभेदयोरन्योन्यप्रतिषेधरूपत्वादेकविधेरपरनिषेधनान्तरीयकत्वात् तत्कथमनयोरेकाधिकरणत्वं मत्तोन्मत्तेतरः प्रतिपद्येत ? तथा हि,—तन्नाम तस्मादभिन्नं यदेव

---

[1] Cf. Āptamīmāmsā III 59 & 57. [2] Cf. Tattvasamgraha & Pancika s'lokas 1745-46, cf S'lokavārtika s'loka 57 & 58 b & 62 b & 63 a, pp 561 & 562 (Chowkamba Sanskrit Series).

[3] शबलोवर्णः. [4] रूपावधारणम्.

यत्; भिन्नं च तत्तस्माद्यद्यन्न भवति। अतश्च व्यक्तिभ्यस्सा-मान्यं भिन्नमभिन्नं चेति ब्रुवाणो व्यक्तयस्सामान्यं न व्यक्तिभ्यः सामान्यमिति ब्रूते। कथं स्वस्थचेताश्चेतस्यपि तदेतदारोपयति। प्रयोगः—यद्यदेव न तत् अतद्भवति यथोष्णं वह्निरूपं नामो-ष्णम्। व्यक्तय एव सामान्यमिति स्वभावविरुद्धोपलब्धिः प्रसङ्गः। उभयथा प्रतीतेरुभयोपगम इति चेत्। ननु, प्रतीति-रप्रतीतेर्बाधिका न तु मिथ्याप्रतीतेः वितथस्यापि प्रतीति-दर्शनात्। अन्यथा हि प्रतीतिपथानुसारिणा भवता द्विचन्द्रा-दयोऽपि न निह्नोतव्याः। बाधकवशात्ते निह्नूयन्ते इति चेत्; इहाप्येतदनुमानमपि बाध्यादिदोषत्रयरहितलिङ्गजं बाधकं किं न पश्यति देवानांप्रियः? न संविदो युक्तिभिरस्ति बाधेति चेत्; ननु किमियं राज्ञामाज्ञा येनाविचार्य गृह्येत। प्रत्यक्षस्वभावा संवित् तच्च ज्येष्ठं प्रमाणमतो न बाध्यत इति चेत्। किं पुनरनु-मानं लक्षणोपेतमपि बाध्यते? एवमेतदिति चेत्। न तर्हि इदमनुमानं प्रमाणं स्यात्। लक्षणयुक्तेऽपि बाधसम्भवे तल्लक्षणमेव दूषितं स्यादिति सर्वत्रानुमानेऽनाश्वासः। अथा-नुमानाभासो बाध्यते? बाध्यतामध्यक्षाभासः प्रत्यक्षेणैव पुनरियं संवित्तिः तत्कथमिति बाध्यत इति चेत्; नन्वियमपि प्रत्यक्षाभासैव, अनुमानेन बाध्यमानत्वात्। अथ प्रत्यक्षमेव प्रत्यक्षस्य तदाभासतां बाधकत्वात् साधयति न त्वनुमान मित्यभिनिवेशः, कथं तर्हि ज्वालादिविषयायाः प्रत्यभिज्ञायाः

प्रत्यक्षायाः प्रत्यक्षाभासता व्यवस्थाप्येत ? न खलु ज्वालादीनामपि क्षणिकत्वमध्यक्षमवधारयेत् । तस्मादनुमानमेव ज्वालादीनां क्षणिकत्वं साधयत् बाधकमेव तस्या इत्यकामेनापि तु कुमारिलेनाभ्युपेतव्यम् । न च शक्यं वक्तुं सामान्यमेव केवलं तथा विषयीक्रियत इति ! तथा हि तदेवेदं ज्वालात्वमिति स्यात् न सैवेयं ज्वालेति । तस्मान्नानैकान्तिको हेतुरित्यलं बहुप्रलापितया ॥

॥ जितारिपादानां कृतिर्जातिनिराकृतिस्समाप्ता ॥

—(*)—

# अनेकान्तवादनिरासः

इदानीमार्हतमतं विचार्यते ;— इहामी दिगम्बराः द्रव्य-पर्यायरूपेण उत्पत्तिस्थितिप्रलयात्मकं भावग्रामं वर्णयन्ति। तत्रावस्थासु सकलासु अनुगतस्वभावं द्रव्यमाचक्षते, यथा केयूरकटककुण्डलाद्यवस्थास्वनुयायि सुवर्णम्। सत्यद्रव्यात्मनि उत्पादव्ययधर्मकाः पर्यायाः। यथा सत्यपि द्रव्ये जायमाना व्ययमानाश्च केयूरादयः। यथा घटं भञ्जयित्वा मौलिः क्रियते तथा घटो नश्यति मौलिरुत्पद्यते, सुवर्णं तु नोदेति न व्येति, इति उत्पादव्ययध्रौव्यात्मकं वस्तु। यदाह—

[1] घटमौलिसुवर्णानां नाशोत्पादस्थितिष्वयम्।
शोकप्रमोदमाध्यस्थ्यं जनो याति सहेतुकम्॥

न नाशेन विना शोको नोत्पादेन विना सुखम्।
स्थित्या विना न माध्यस्थ्यं तस्माद्वस्तु त्रयात्मकम्॥

[1] न सामान्यात्मनोदेति न व्येति व्यक्तमन्वयात्
व्येत्युदेति विशेषेण सहैकत्रोदयादि सत्॥

इति। विरुद्धधर्माध्यासस्य सर्वत्र भेदलक्षणत्वादिति। न ह्येकस्य त्रैरूप्यमुपपद्यते। यदिह सत्यपि विरुद्धधर्माध्यासे

---

[1] Āptamimāmsā III, 59-57.

द्रव्यपर्याययोरभेदोऽभ्युपगम्यते तदा घटपटयोरप्यभेदोऽभ्युपगन्तव्यः। अथ मन्यसे द्रव्यपर्याययोः परस्परतोऽनैकान्तिको भेदो अभेदो वा अभ्युपगम्यते, किं तु देशकालस्वभावाना* मभेदात् उतोच्यते सङ्ख्यासंज्ञालक्षणार्थभेदात् भेदस्तु वर्ण्यते। न हि कटकादीनामन्यो देशोऽन्य एव सुवर्णस्य च! न च कटकादयः सुवर्णाद्भिन्नकालाः! नापि कटकादीनां सुवर्णस्य च स्वभावे नानात्वमस्ति! अतो देशकालस्वभावानामेकत्वादेकता द्रव्यपर्याययोः। एकं द्रव्यं बहवः पर्याया इति सङ्ख्यासंज्ञाभेदः। अनुवृत्तिलक्षणं द्रव्यं। व्यावृत्तिलक्षणाः पर्यायाः इति लक्षणभेदः। केयूरकटकाभ्यां च कफोणि पाणिभूषणं क्रियते, सुवर्णेन तु केयूरादिकं तदेवेति कार्यमपि भिद्यते द्रव्यपर्याययोः। अतः [1]संख्यासंज्ञालक्षणप्रयोजनभेदात् भिन्नत्वं द्रव्यपर्याययोरिति॥

अत्रैवं चिन्त्यते; यदि तावत् द्रव्यपर्याययोः स्वभावाभेदेन अभेदमभिधत्ते तदा द्रव्यपर्याययोरेकरूपतैव तात्त्विकीति संख्यादिभेदाद्भिन्नरूपता कल्पनामात्रकल्पिता स्यात्।

---

* मभेदादेकतोच्यते इति स्यात्; उत्तरत्र 'एकत्वादेकता' इति निगमनात्॥

[1] Cf. Āptamīmāṃsā IV 72

संज्ञासंख्याविशेषाच्च स्वलक्षणविशेषतः।
प्रयोजनादिभेदाच्च तन्नानात्वं न सर्वथा॥

न हि ययोः स्वभावाभेदः तयोरन्यथा पारमार्थिको भेदः सम्भवी। भेदे च तयोरभिधीयमाने स्वभावभेद एव तयोरभ्युपगतो भवेदिति न तयोः स्वभावाभेदेनाभेदः सिध्येत्। नच तेनैव स्वभावेन भेदश्चाभेदश्च। नचान्येन स्वाभावेन भेदोऽन्येनाभेद इत्यपि प्रेक्षावतो वक्तुमुचितम्! स्वभावभेदाभेदाभ्यां भेदाभेदाभ्युपगमप्रसङ्गात्। यदि चान्येन स्वभावेन भेदोऽन्येन च स्वभावेनाभेद इत्यभ्युपगम्यते तदाऽन्यद्द्रव्यपर्यायाख्यमेकं वस्तु तयोरन्ये एव चान्योन्यभिन्ना द्रव्यपर्याया इति नैकमनेकात्मकं वस्तु वस्तुतः समर्थितं स्यात्। स्वभावेन चाभेदे देशकालाभेदादभेद इति किमनयाऽनुयुक्तघोषणया। ययोर्हि स्वभावेन भेदो न तयोर्देशकालाभेदादप्यभेदो यथा रूपरसयोः। यदि च पर्यायाणां द्रव्यस्वभावेनाभेदः, तदा पर्यायाणां द्रव्यात्मन्यनुप्रवेशात् द्रव्यमेव केवलमवशिष्यत इति संख्येयभेदाभावात् संख्याबाहुल्यं नास्तीति पर्याया इति बहुवचनं न प्राप्नोति। संज्ञिभेदाभावाच्च न तदाश्रयः संज्ञाभेदः। अथ पर्यायेभ्यो द्रव्यस्वभावेनाभेदः, तदा द्रव्यस्य पर्यायात्मन्यनुप्रवेशात् पर्याया एव केवलमवशिष्यन्त इति संख्यैकत्वाभावात् (संख्यैकत्वं नास्तीति) द्रव्यमित्येकवचनं न प्राप्नोति ॥

नचैकानेकवचनप्रयोगमात्राद्वस्तूनामेकत्वानेकत्वे; षण्णगरी दारा इति विनाऽपि भेदाभेदाभ्यां बहुवचनैकवचनप्रयोगदर्शनात्। नच संज्ञिनानात्वमात्रेण संज्ञानानात्वम्; एकस्यापि

तुरङ्गस्य हरिहयाश्वसप्त्यादिसंज्ञाबाहुल्यदर्शनात् । सति च स्वभावाभेदे लक्षणभेदोऽप्यनु[प]पत्तिमानेव । न हि द्रव्यपर्यायोरेकत्वे सत्यनुवर्तते द्रव्यं तदात्मकं च पर्यायं रूपं व्यावर्तत इत्युक्तम् । द्रव्यादिपर्यायाणामभेदे तस्मिन्ननुवर्तमाने पर्याया अप्यनुवर्तेरन् । अन्यथा हि तदेवानुवर्तते नानुवर्तते चेति स्यात् । पर्यायेभ्यश्च द्रव्यस्याभेदे तेषु व्यावर्तमानेषु द्रव्यमपि व्यावर्तेत ; अन्यथा हि त एव तथैव व्यावर्तन्ते न व्यावर्तन्ते चेति स्यात् । न चैतदनुन्मत्तो ब्रूयात् । स्वभावाभेदं च द्रव्यपर्याययोर्वर्णयता द्रव्यस्य कार्यं यत्तत् पर्यायजातस्य ; यच्च पर्यायजातस्य तद्द्रव्यस्येति स्फुटतरमा[वे]दितं भवति । तथा च सति द्रव्यपर्याययोः कार्यभेदो न सम्भवत्येव प्रागेव तन्निबन्धनो भेदः । एकस्याप्यनेककार्यकारित्वदर्शनान्न कार्यभेदाद्भेदः सिध्यति । न हि मलयजमृगाङ्कादयो युगपद्बहूनां बहूनि विज्ञानानि जनयन्तोऽपि स्वभावनानात्वमनुभवन्ति ! एक एव प्रदीपः करजलालोकादिकमनेकधा कुर्वन्नवलोक्यत इति न कार्यभेदादपि भेदव्यवहारो ज्यायान् । एतेन हि त(अन्य)दपि प्रत्युक्तम् । यदाह कुमारिलः—

"सर्वं हि वस्तु रूपेण भिद्यते न परस्परम् ।"

इति । यदि हि यदेव वस्तुत्वं तदेव वेदचाण्डालालापयोः ब्राह्मणचाण्डालयोरपि ; तथा वेदचाण्डालालापयोः ब्राह्मणचाण्डालयोश्चैकत्वं स्यात् । अथ वस्तुत्वेनाभेदेऽपि प्रकारान्तरेण भेद इष्यत इति चेत् ; प्रकारान्तरं तद्वतो वस्तुरूपादनर्था—

तरं वा स्यादर्थान्तरं वा ? अनर्थान्तरत्वे कथं तदाश्रयो भेदः । अर्थान्तरत्वे स्वरूपेणापि भेदात् भेद एव विशीर्यते । तस्मात् सर्व एव भावाः परस्परव्यावृत्तमूर्तयो न केनचिदंशेन मिश्रा भवन्ति । तदुक्तम्—

सर्वे भावाः स्वभावेन स्वस्वभावव्यवस्थिताः ।
स्वभावपरभावाभ्यां यस्माद्व्यावृत्तिभागिनः ॥

इति । अतोऽनेकान्तवादो विदुषा न विधातव्यः ॥

दिगम्बरमतपरिक्षा समाप्ता
कृतिरियं जितारिपादानाम् ।

—(*)—

प्रत्यभिज्ञानसंज्ञातं प्रमाणं कैश्चिदिष्यते
एकत्वंविषयम् . . . . . . . ॥

—(*)—

# APPENDIX I

List of quotations from other works.

Page

३ प्रमाणमविसंवादि ज्ञानमर्थक्रियास्थितिः (P V. II. 1)

„ ज्ञेयस्वरूपसंवित्तिरिष्टा तत्र क्रियास्थितिः ?

„ सन्देहो भवन् केन वार्यते (?)

४ तद्द्विविधं प्रत्यक्ष—चेति (N B. I. 2-3)

११ तत्र—मभ्रान्तम् (N B. I. 4)

„ नाभावः—प्रतिपत्तिः (पण्डितचक्रचूडामणेः) ?

१२ अभिलापसंसर्ग—कल्पना (N B. I. 5)

१२ भिन्नकालं—ज्ञानाकारार्पणक्षमम् (P V. III. 24)

१३ न सोऽस्ति—भासते (V)

„ तिमिराशु—प्रत्यक्षम् (N B. I. 6)

१४ तच्चतुर्विधं—(N B. I. 7)

„ स्वविषयानन्तर—मनोविज्ञानम् (N B. I. 9)

१५ द्वाभ्यां भिक्षवो—मनसा च (भगवतः) ?

„ सर्वचित्त—स्वसंवेदनम् (N B. I. 10)

१६ विज्ञानं जडरूपेभ्यो—जडरूपता (T S. 2000)

१७ कल्पितःकर्म—निरुच्यते (?)

„ नागृहीत—विशेष्ये (?)

„ चक्षुषो—घटिष्यते (त्रिलोचनस्य)

Page

१८ रूपादिप्रकाश—ज्ञानस्यापि सिद्धिं (भट्टस्य)

,, न हि कश्चिदज्ञाते—गच्छति (मीमांसाभाष्ये)

,, तस्य ज्ञानं तु—ज्ञाततावशात् (मीमांसावार्त्तिके)

,, अप्रत्यक्षोपलम्भस्य—प्रसिध्यति (?)

,, परोक्षे यदि—क्षमः (अलङ्कारकारस्य) (?)

१९ शब्दार्थग्राहि—मतोभिलषम् (P V. 287)

,, स्वरूपे सर्व—विपर्ययः (?)

,, भूतार्थ—योगिज्ञानम् (N B. I. 11)

२० नित्यं तमाहु—संस्थिता (P V. II. 204)

२१ तस्य—स्वलक्षणम् (N B. I. 12)

२२ यथाऽवयवि—समवायश्चेति (वैभाषिकसूत्रे)

,, भागा एव—सम्प्रतीयते (?)

२३ अर्थसारूप्यं—प्रमाणफलम् (N B. I. 20)

,, तदेव—प्रमाणफलम् (N B. I. 18)

२४ अनुमानं—परार्थं च (N B. II. 1)

,, तत्र—अनुमेयज्ञानम् (N B. II. 3)

,, लिङ्गस्या—सत्वमेव (N B. II. 5)

२५ सपक्षे एव सत्त्वम् (N B. II. 6)

२६ असपक्षे चासत्त्वम् (N B. II. 7)

२७ त्रिरूपाणि लिङ्गानि (N B. II. 11)

२८ स्वभावः हेतुः (N B. II. 16)

Page

२९ अनुपलब्धिर्यथा—उपलब्धेः (N B. 13)

३० अत्रे द्वौ—प्रतिषेधहेतुः (आचार्यस्य) (N B. II. 19)

३१ अमूढस्मृति—व्यवहारसाधनी (N B. II. 29)

,, स्वभावानुपलब्धिः—अनुपलब्धेः (न्यायवादिनः) (N B. II. 32)

३१ कार्या—धूमाभावात् (N B. II. 33)

,, कारणा—भावात् (N B. II. 40)

,, व्यापका—भावात् (N B. II. 34)

,, स्वभाव—वह्नेः (N B. II. 35)

३२ कार्यविरुद्ध—वह्नेः—(N B. II. 38)

,, कारण—विशेषत्वात् (N B. II. 41)

,, व्यापक—दहनात् (N B. II. 39)

,, कारण—धूमात् (N B. II. 42)

३४ त्रिरूप—परार्थानुमानम् (N B. III. 1)

,, तद्द्विविधं—वैधर्म्यवच्च (N B. III. 4, 5)

,, संस्कृतं क्षणिकं सर्वं (सौत्रान्तिकस्य) ?

३६ यत्सत्—यथा घटः (N B. III. 11)

,, यदुत्पत्ति—शब्दः (N B. III. 12)

३७ यत्कृतकं—यथा घटः (N B. III. 13)

,, अपेक्षित—कृतकः (N B. III. 14)

३८ कार्यहेतो—धूमश्चात्र (N B. III. 23)

,, असत्यग्नौ—धूमः (N B. III 27)

Page

३८ यत्सदुपलब्धि—घटस्य (N B. III. 25)

४० सन्दिग्धे हेतु—रनाश्रयः (P V V IV. 91)

४१ कार्यत्वस्य—विपक्षेक्षणत् (ज्ञानश्रीमित्रपादस्य)

४१ यथा स्वाभाविकः—दर्शनात् (त्रिलोचनस्य)

४३ सर्वादृष्टि—दर्शनात् (?)

४४ विशेषस्मृत्यपेक्ष एव—शङ्कितुमुचितम् (वाचस्पतेः)

४९ प्रसङ्गोद्वय—हानये (P V V Ch. IV. 12)

४९ दूषणानि न्यूनताद्युक्तिः (N B III. 138)

५० अहमित्यपि—वेदनात् (अलङ्कारकारस्य)

५४ शब्देन—दृष्टाविव (न्यायपरमेश्वरस्य)

५५ एकप्रत्यवमर्शस्य—नेन्द्रियादिवत् (?)

५८ नित्यस्य—सदृशात्मनः (P V I. 267-68) (धर्मकीर्तेः

५९ पूर्वप्रमितमात्रे—अतिरेकिणी (भट्टस्य)

६० सत्त्वलोक—नचास्ति (?)

६१-६२ आकाशं—शून्यमकर्तृकं (भगवतः)

६२ मुक्तिस्तु—भावा (?) (P V. II. 253)

६२ स्वाकार—गोचराः (सौत्रान्तिकस्य)

६४ यदि संवेद्यते—तदुच्यते (अलङ्कारकारस्य)

६६ भागा—सम्प्रतीयत (?)

६८ षट्केन—दणुमात्रकः (V. 12)

„ न सन्नावयवी—सन्निभः (?)

Page
६९ ग्राह्यग्राहक—परमार्थसत् [?]
,, नान्यो—प्रकाशते (P V III. 32)
,, बाह्यो—प्रवर्तते [भगवतः]
७० नेष्टं—गगनाब्जवत् (?)
,, भावा—न विद्यते (P V III. 360) (कीर्तिपादस्य)
,, यदा तु—समदर्शिनां (अलङ्कारकारस्य)

———

# APPENDIX II

A list of authors referred to in the *Tarkabhāṣa*.

धर्मकीर्तिः—१, ५८, ७०.

पण्डितचक्रचूडामणिः—११.

परेण—१३. (भर्तृहरिणा)

भगवान्—१५, ३४, ६०, ६९.

अलङ्कारकारः—१७, १८, ५०, ६३, ७०.

आचार्यः—१३, ३०. (धर्मकीर्तिः)

त्रिलोचनः—१७, ४१.

भट्टः—१८, ५९.

न्यायपरमेश्वरः—२२, ५३. (धर्मकीर्तिः)

न्यायवादी—३१. (धर्मकीर्तिः)

ज्ञानश्रीमित्रपादः—४१.

वाचस्पतिः–४३.

तैर्थिकाः ५०.